ॐ

इयम् अत्र
पाणिनीयायाः संस्कृतभाषायाः अवयवभूतानां नवपञ्चाशतो वर्णानां स्वरूपं परिचाययन्ती
वेदघ्राणाङ्ग-शिक्षाशास्त्र-प्रवेशग्रन्थरूपा


।। शिक्षाप्रथमकृतिः ।।

अर्थप्रकाशाख्यया सरलवृत्त्या संवलिता

सदाशिवब्रह्मेन्द्रेतिख्यातश्रीमत्सदाशिवेन्द्रसरस्वतीश्रीचरणचरणसेविना
श्रीमत्कामकोटिपीठाधीशश्रीजयेन्द्रसरस्वतीशङ्कराचार्यश्रीचरणकटाक्षविषयेण
श्रीरमणशर्मणा विरचिता
विद्याविनयसम्पन्नेष्वग्रगण्यानां श्रीमतां मणिद्राविडशास्त्रिणाम् आशीर्वचनेन समेधितगुणा

द्वादशशतोत्तरपञ्चसहस्रतमे (५११२) वर्तमानकल्यब्दे
दशोत्तरद्विसहस्रतमे (२०१०) लौकिकाब्दे
लोकप्रकाशं समानीता

जगद्गुरुशङ्कराचार्यकाञ्चीकामकोटिपीठाधीश्वराणां श्रीमच्चन्द्रशेखरेन्द्रसरस्वतीश्रीचरणानां
तदन्तेवासिवर्यश्रीजयेन्द्रसरस्वतीश्रीचरणानां
तदन्तेवासिवर्यश्रीशङ्करविजयेन्द्रसरस्वतीश्रीचरणानां च
पादारविन्दयोः सभक्ति समर्पिता
विजयतेतराम्



कृतिरियमतियत्नाद् रच्यते यन्मयेति मतमिदमतितुच्छं त्वत्कृपैव व्यपोहेत् ।
तव कृतिरिति बुद्धिं देहि शुद्धां दृढां च न तु खलु मम शक्तिः क्वापि सत्या समस्ति ।।
वितरसि यदि भाग्यं मद्गुरो चन्द्रचूड विलसतु हृदि शश्वत् त्वन्मुखं स्मेरसौम्यम् ।
सुदुरितकृदयं च त्वत्कृपाया अनर्होऽप्यनुभवतु कृपां तेऽव्याजदीनानुकम्प ।।

ॐ

॥ आशीः ॥

पूज्यतमैः विद्वद्धुरेण्यैः अद्वैतवेदान्ताद्यनेकशास्त्रविशारदैः श्रीमन्मणिद्राविडशास्त्रिभिः अनुगृहीता

॥ श्रीगणेशाय नमः ॥

श्रीरमणशर्मणा विरचितः शिक्षाप्रथमकृतिनामा ग्रन्थः आमूलाग्रमवलोकितः। प्रातिशाख्याद्यार्षग्रन्थोक्तसिद्धान्तानां सूक्ष्म-परिशीलनेन विरचितोऽयं ग्रन्थः संस्कृतभाषागतानां वर्णानां संक्षेपेण यथावत् स्वरूपावगमे नितरामुपकरोति। ग्रन्थेऽस्मिन् ग्रन्थकर्तुः सूक्ष्मार्थविचारकौशलं चिन्तनस्वातन्त्र्यं प्रतिपादनप्रौढिमा च स्पष्टं प्रतिफलन्ति। सूत्ररूपेण सिद्धान्तानां संग्रथनं पुनस्तद्विवरणं चाध्येतॄणां विषयस्य ग्रहणधारणयोः सुकरतां संपादयति। एतस्य ग्रन्थस्याभ्यासः स्थान-करण-संसर्ग-प्राण-अनुप्रदानादिभिर्वर्णतत्त्वं जिज्ञासमानानामवश्यं मतिवैशद्याय कल्पेतेत्यत्र नास्ति संशीति-लेशोऽपि। आशासे लेखकस्यास्य लेखनी विषयान्तरेष्वप्येवमेव प्रसरतात्, अवाप्नुताच्चायं ग्रन्थकारः अन्नपूर्णाम्बासमेतस्य भगवतो विश्वनाथस्य प्रसादेन श्रेयःपरम्परामिति —

मणिद्राविडः
22-10-03

ॐ

॥ विषयानुक्रमणिका ॥

१. प्रस्तावना ५

२. प्राक्कथनम् - शिक्षाशास्त्रस्य अवश्याध्येयता ९

३. पुस्तकस्थलेखनवैचित्र्यव्याख्यानम् १२

४. सूत्रपाठः १३

प्रथमं प्रकरणम् – वर्णश्रुतीनां तद्धर्माणां च परिचयः

५. ग्रन्थोपक्रमः १७

६. वर्णलक्षणम् १८

७. श्रुत्युपदेशः २०

८. श्रुतिधर्मप्रतिज्ञा २२

द्वितीयं प्रकरणम् – साधारणानां वर्णश्रुतिधर्माणां व्याख्यानम्

९. अनुप्रदानम् २३

१०. प्राणः २६

११. आनुनासिक्यम् २६

१२. संसर्गः २८

तृतीयं प्रकरणम् – वैशेषिकाणां वर्णश्रुतिधर्माणां व्याख्यानम्

१३. स्थानानि ३४

१४. करणानि ३४

१५. जिह्वाविन्यासाः ३९

१६. हनुविन्यासाः ३९

१७. ओष्ठविन्यासः ४०

१८. चतुर्थं प्रकरणम् – कालस्य व्याख्यानम् ४२
१९. पञ्चमं प्रकरणम् – श्रुतिकालयोगेन वर्णनिरुक्तिः ४३
२०. ग्रन्थोपसंहारः ४७

ग्रन्थसारसङ्ग्रहः

२१. विषयसङ्ग्राहकाणि कोष्ठकानि ४८
२२. वर्णस्वरूपनिरुक्तिवाक्यानि ५२

अनुबन्धः

२३. वर्णश्रुतिप्रज्ञानम् ५९
२४. ग्रन्थसमर्थनम् ६६

२५. ग्रन्थकर्तुः उपसंहारवचांसि ७८
२६. अकारादिक्रमेण सूत्रसूची ७९

* * *

ॐ

॥ प्रस्तावना ॥

'शिक्षा घ्राणं तु वेदस्य' इति शास्त्रवचनम् । शिक्षाशास्त्रं वेदस्य नासिकास्थानीयम् इत्यर्थो ज्ञायते । नासिकया प्राणनं यदि न सम्यक् क्रियते, अनर्थो भवतीति सर्वलोकप्रसिद्धम् । एवं शिक्षोपदिष्टानाम् उच्चारणपद्धतीनां परिज्ञानं यदि न विद्यते, तर्हि प्रयुज्यमानानां वेदशब्दानां शुद्धत्वं सन्दिग्धं भवति, दोषे सति च मन्त्राणां दौर्बल्यं विपरीतफलदत्वं वा इति अनिष्टमेव स्यात् । तस्मात् वेदनासिकया शिक्षया प्राणनेन संस्करणेन सम्यक् वेदशब्दान् जीवयेत् इति शास्त्रवचनस्य तात्पर्यं भवति ।

न च केवलं वेदभाषाया एव सौष्ठवाय शिक्षा आदरणीया । लौकिकस्यापि संस्कृतस्य शुद्धये सा अपेक्षिता । तथा हि अभिभाषमाणं वाग्विदां वरं हनुमन्तं 'बहु व्याहरताऽनेन न किञ्चिद् अपशब्दितम्' इति प्रशंसन् भगवान् श्रीरामः तदीयायां वाचि न केवलं व्याकरणज्ञानस्य प्रतिफलनं वदति, प्रत्युत शिक्षाज्ञानेन समुत्पादितान् गुणान् अनेकैः श्लोकैः उक्त्वा तेनैव उपसंहरति –

'संस्कारक्रमसम्पन्नाम् अद्रुताम् अविलम्बिताम् । उच्चारयति कल्याणीं वाचं हृदयहर्षिणीम् ॥
अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया । कस्य नाराध्यते चित्तम् उद्यतासेरेरपि ॥'

इति । शारीरे मधुरे सत्यपि अक्षरशुद्धिहीनां वाचं विद्यावन्तो न रोचयन्ते इति व्यक्तम् । तस्मात् लौकिकेष्वपि वाक्प्रयोगेषु यः सौष्ठवाय स्पृहयेत्, अवश्यं तेन शिक्षा अध्येया ।

वेदश्चापि हि शिक्षां बहुमन्यते । तथा हि 'शीक्षां व्याख्यास्यामः' इत्येव तैत्तिरीयोपनिषदः आरम्भः वर्तते । यद्यपि उपनिषद्भागः प्राधान्येन जीवः, ईश्वरः, ब्रह्म, मोक्षः इत्यादीन् पारलौकिकान् विषयान् एव निरूपयति, तेषु अर्थप्रधाने विचारे क्रियमाणेऽपि, वेदस्य यदस्ति शाब्दं स्वरूपं वर्णात्मकं, तस्मिन् अनास्था न भवेत् इति सूचयति 'शीक्षां व्याख्यास्यामः' इति उपनिषद्ग्रन्थारम्भः । इत्थं भगवत्पादशङ्कराचार्यैः तस्य ग्रन्थस्य भाष्ये स्पष्टम् उपवर्णितम् । एतस्मादपि शिक्षाशास्त्रस्य महत्त्वम् अवगम्यते ।

*

इत्थं बहुप्रशंसाभाज्यपि सति अस्मिन् शास्त्रे, यथा भारतीयस्य सनातनस्य सम्प्रदायस्य महिमा पाश्चात्त्यव्यवहारमोहेन सञ्छन्नः अभवत्, एवं शिक्षायाः अपि प्रामुख्यम् अज्ञातवासं जगाम इव । अधुना च लोके 'शिक्षाशास्त्रम्' इत्युच्यमाने शिक्षणाख्यविद्याप्रदानविधानविषयकं

विचारजातम् इत्येतम् एव अर्थं प्रतियन्ति।

वस्तुतः प्राचीनशास्त्रसरण्यां शिक्षा इत्यस्य शिक्षणसामान्यम् इत्यर्थे सत्यपि वर्णोच्चारणशिक्षणम् इत्यपि रूढः एव अर्थः। शास्त्रमध्ये च शिक्षाशब्दो वर्णशिक्षामेव बोधयति। अधुनातनभ्रान्तौ हेतुस्तु अस्य शास्त्रस्य अध्ययनाध्यापनप्रणाल्याः प्रचारो विनष्टप्राय इत्येतदेव। घनान्तं वेदं विद्वांसः केचन एव एतत् शास्त्रम् अधीयते। तत्रापि तेषाम् अत्र प्रायः केवलं परिचयो जायते। पाण्डित्यं तु नितरां दुर्लभमिति।

अस्यां परिस्थितौ मम याः जिज्ञासाः अवर्तन्त वर्णविषयिकाः, तासां शमनं मया अधिकतया स्वयमेव सम्पादनीयं समवर्तत प्राचीनस्य शिक्षाशास्त्रस्य, आधुनिकस्य फ़ोनेटिक्स्-नाम्नः वर्णविज्ञानस्य च अध्ययनं कृत्वा। यच्च किञ्चित् ज्ञानं मया प्राप्तं, यद्यपि तत् नैतावता सर्वैरंशैः पूर्णं, तथापि तत् श्रद्धावद्भ्यः वितरीतुं कश्चन प्रयासः करणीयः इति विचारः उत्पन्नः मन्मनसि। अस्यैव विचारस्य फलं शिक्षाप्रथमकृप्तिनामकः एषः ग्रन्थः। यथा इतरेषु शास्त्रेषु प्राथमिकपरिज्ञानस्य प्राप्तये तर्कसङ्ग्रहः, लघुसिद्धान्तकौमुदी इत्यादयः प्रवेशग्रन्थाः वर्तन्ते, तथा शिक्षाशास्त्रे भवितुम् इच्छति अयं मम प्रयत्नः।

अत्र सन्ति मया यथामति स्वयं विरचितानि नवतिः सूत्राणि, सरलवृत्तिसहितानि। तानि च सूत्राणि – वर्णलक्षणं किं, तदुत्पादका धर्माः के, तेषां स्वरूपं किं, केषु वर्णेषु के धर्माः भवन्ति, मात्राव्यवस्था का – इत्यादीन् विषयान् सङ्क्षेपेण किन्तु साकल्येन बोधयन्ति। उच्चारणप्रक्रियायाः स्फुटज्ञानप्राप्तये च रेखाचित्राणि अपि पुष्कलतया योजितानि अत्र। किञ्च सर्वेषाम् अपि वर्णानां सिद्धान्तरीत्या विस्पष्टस्वरूपपरिज्ञानाय ग्रन्थोक्तविषयसङ्ग्रहात्मकानि वर्णलक्षणानि रचितानि।

अयं मम चिक्रोडसेवातुल्यः प्रयत्नः शिक्षाशास्त्रपरम्परायाः पुनर्जागरणे प्रथमसोपानं भवतु इत्याशासे॥

*

अस्य ग्रन्थस्य प्राथमिकं किञ्चिद् रूपं मया प्रायः अष्टभ्यो वर्षेभ्यः पूर्वमेव अध्येत्रवस्थायां कृतम्। तदाऽऽरभ्य अधुना अस्य परिष्कृतस्य रूपस्य सम्पादनं यावत् मां शिक्षाविचारे प्रोत्साहनेन महाभाष्यादिव्याकरणग्रन्थगतनानाविषयपरामर्शप्रदानेन सिद्धं ग्रन्थमिमं सुपरिशील्य परिष्काराणां सूचनेन च माम् अन्वगृह्णन् मम व्याकरणाचार्याः श्रीमन्तो

हित्तिलहळ्ळि-महाबलेश्वरभट्टाः । तेभ्यः नमोवाकान् व्याहरामि । तेषाम् आचार्याः मम प्राचार्याः श्रीमन्तो रङ्गनाथशर्माणः सुप्रसिद्धाः वैयाकरणाः संस्कृतसम्बन्धिनानालेखनलघुप्रबन्धादिनिर्मातारः अपि माम् अतीव अभिमानेन आशिषा अनुगृह्य अस्मिन् कार्ये अविरत्या प्रवर्तस्वेति उदसीषहन् ।

तदनु अस्य ग्रन्थस्य परिशीलनपूर्वकम् आशीर्वचनं दत्तवन्तो मम मीमांसाचार्याः चेन्नपुरीवास्तव्याः श्रीमन्तो मणिद्राविडशास्त्रिणः । विशालमनसस्ते तस्मिन् आशीर्वचने तत्रभवन्तो मम बहुकारणां प्राचीनशिक्षासम्प्रदायोल्लङ्घनेन नवीनशिक्षासम्प्रदायप्रवर्तनेच्छां चिन्तनस्वातन्त्र्यमिति यत् श्लाघितवन्तः तत् तेषामेवानुरूपम् औदार्यम् । अपि च नानाविषया मया भूयांसो ग्रन्था लिख्यन्ताम् इति तेषाम् आशीरपि स्वज्ञानपरिमित्यनुसन्धानजन्येषु सन्देहेषु मां प्रोत्साहयति लेखने च अद्यापि प्रवर्तयति । तस्मात् आशीर्वचनम् अनुगृहीतवञ्च आचार्येभ्यः साष्टाङ्गप्रणतिततीः समर्पयामि ।

अन्ये च बहवो विद्वांसः – आचार्यस्थानीयाः मित्राणि वा – ये ग्रन्थमिमं परिगृह्य परिशील्य सन्तुष्य च प्रकाशनं प्रति मां समचोदयन्, तेषामपि उचिताम् अर्हणां वाचा करोमि । ये केचान्ये अनुल्लिखिताः स्युः अत्र, तेषां विषयेऽपि कार्तज्ञ्यं हृत्स्थं विज्ञापयामि ।

*

अथास्य पुस्तकस्य उपयोगक्रमम् अधिकृत्य विज्ञप्तिः क्रियते । तत्र प्रथमतः सर्वे अध्यापकाः विद्यार्थिन एव, विशेषतः प्रचाररहिते अस्मिन् शास्त्रे । तस्मात् अध्यापयितुम् इच्छन्तः आदौ कृत्स्नमिदं पुस्तकं स्वयं सम्यक् पठित्वा, यद्यपेक्षितं अधोदत्तं सम्पर्कसङ्केतम् उपयुज्य लेखकं मां पृष्ट्वा, सर्वान् विषयान् असंशयान् विधाय मनसा अवधारयन्तु । ततः शास्त्रं भृशं प्रचारयन्तु ।

अत्र पुस्तके आदौ विद्यार्थिनां कण्ठपाठसौकर्याय शिक्षाप्रथमकृतेः सूत्रपाठः दत्तः । ततः विषयग्रहणार्थं वृत्त्या चित्रैश्च सहितानि सूत्राणि पञ्चधा प्रकरणेषु विभज्य विन्यस्तानि । ततः विषयधारणार्थं ग्रन्थसारसङ्ग्राहकाणि कोष्ठकानि, वर्णस्वरूपनिरुक्तिवाक्यानि च योजितानि । एतदन्तं विद्यार्थिन उद्दिश्य निबद्धम् । ततः समर्थतराणां वर्णश्रुत्याख्ये एतद्ग्रन्थोक्ते अपूर्वे विषये भूयो जिज्ञासमानानां तत्प्रज्ञानार्थं अनुबन्धे विस्तृतं टिप्पणं कृतम् । तदुत्तरं लिखितं ग्रन्थसमर्थनं व्याकरणं विदुषां ग्रन्थेऽस्मिंश्च प्रामाण्यसंशयवतामेव । प्राक्कथनं तु सर्वैरवगन्तुं शक्यं पठनीयं च ।

पुस्तके दत्तानि चित्राणि शिक्षां विविदिषद्भिः सुष्ठु मनसि निधेयानि यथा स्वयम् अदृष्ट्वा पुना रचयितुं शक्यन्ते । अन्वयश्च तु तेषां स्वशरीरस्थैरङ्गैः अवश्यम् अनुसन्धेयः । प्रत्यक्षः खलु

स्वशरीरनिष्पादी अस्य शास्त्रस्य विषयो न पुनः पुस्तके वर्तते । अपि च वर्णनिरुक्तिवाक्यानि साधु कण्ठे शब्दतो धार्याणि मनसा च अर्थतोऽवधार्याणि । विशेषतो वर्णश्रुतीनां वर्णानां च मिथो भेदः सम्बन्धश्च सम्यक् अवगन्तव्यः । श्रुतिः वर्णस्यात्मा । सात्मनो वर्णान् कुरुत वर्णविचक्षणा भवत !

*

अस्य ग्रन्थस्य अभिवृद्ध्ये यत् विवक्ष्येत – 'अत्र निरूपणं सरलतरं भवतु' 'अत्र भाषा निर्मलतरा भवतु' 'एवं क्रियते चेत् बालाः सुतरां बुध्येरन्' इत्यादिकम् अभिप्रायाविष्करणं, यद्वा 'अत्र मुद्रणदोषो वर्तते' 'अत्र विषयदोषो वर्तते' (!) इत्यादिकं दोषाविष्करणं – तत् सर्वमपि पूर्णग्रन्थाध्ययनोत्तरं चेद् अवशिष्यते अधोदत्ते सम्पर्कसङ्केते अवश्यं लिखित्वा प्रेष्यताम् । तेन उत्तरत्र पुनः प्रकाशनवेलायां पुस्तकं तत्स्थं ग्रन्थं वापि परिष्कृत्य भूय एव लोकान् उपकर्तुं यतेय ।

श्रीचन्द्रशेखरगुरोः कृपया शिक्षाशास्त्रं धर्मानुष्ठानं च लोके प्रवर्धताम् इत्याशासानः,

श्रीरमणशर्मा

सम्पर्कसङ्केतः –
Shriramana Sharma,
Kanchi Shankara Matham, Nerur Agraharam,
Karur District, Tamil Nadu - 639004.
e-mail: jamadagni@gmail.com

ॐ

॥ प्राक्कथनम् ॥

(शिक्षाशास्त्रस्य अवश्याध्येयता)

प्रस्तावनायाम् एव यद्यपि शिक्षाशास्त्रस्य प्रामुख्यं स्तुतिमात्रेण उल्लिखितं, तथापि उपपत्तिरपि अवश्यं प्रदर्शनीया इति शास्त्रीयरीत्या शिक्षायाः प्राशस्त्यं तत्प्रयुक्ता तस्य अवश्याध्येयता च प्रतिपाद्यते।

इदमत्र जिज्ञास्यते, अस्य शास्त्रस्य किं प्रयोजनम् ? अर्थं परस्मै बोधयितुं हि भाषा उपयुज्यते। तच्च प्रयोजनं यथाकथाच क्रियमाणेन उच्चारणेनापि प्रायः सिध्यति लोके। तस्मात् कुतः उच्चारणे इयान् आदरः, येन शास्त्रमेव तदर्थम् आरभ्यते ?

श्रूयताम्। मनुष्यजन्मनः प्रयोजनं न केवलं लोकव्यवहारं कृत्वा सम्पदः अर्जयित्वा तेन सुखानाम् अनुभवनम्। यदि तावदेव प्रयोजनं स्यात् कामं त्वदुक्तया रीत्या नार्थोऽनेन शास्त्रेण। मनुष्यस्य पशूनां च तु न कश्चिद् भेदः स्यात्। **मनुष्यो धर्मं सम्पाद्य तेन आत्मानं लोकांश्च उपकरोति** इत्येव मनुष्यस्य विशेषः।

तस्य च धर्मसम्पादनस्य स्वरूपं तु – सर्वविधेषु व्यवहारेषु 'इदं साधु, अतः कर्तुमुचितम्; इदं पुनरसाधु, अतो न कर्तुमुचितम्' इत्येवंरूपविवेकपूर्वकं साधोरेव परिग्रहणेन अनुष्ठानमेव। तादृशश्च **धर्मविषयो विवेकः शास्त्राद् एव भवति**।

यं यं च व्यवहारं वयं कुर्मः, कायेन वाचा मनसा वा करणेन, तं सर्वं शास्त्रदृष्टेन मार्गेण यदि कुर्मः, तदा तेषु करणेषु शुद्धिः सिध्यति। तद्द्वारा च, कारणशरीरमिति यत् वेदान्तेषु शब्दितम् अस्माकं प्राक्कृतानां कर्मणां निकायभूतं, तत् शनैःशनैः पापविमोकेन शुद्धं भवति। ततोऽस्माकं शान्तिः सुखं च वर्धते। अन्ते च सकलकर्ममलप्रणाशेन निरतिशयानन्दप्राप्तिः श्रेयआख्यं प्रयोजनम्। अपि च लोका अपि अनेन प्रत्यक्षं परोक्षं वा अवश्यम् उपकृता भवन्ति। अत्र च स्वयं शास्त्रं प्रमाणं, पूर्वेषामनुभवश्च। तस्मात् शास्त्रे यत्नः कर्तव्यः।

अस्तु। वर्णविषयकेण शास्त्रेण कथम् ईदृशं प्रयोजनं साध्यते ?

उच्यते। प्रागेवोक्तं सर्वेषु व्यवहारेषु शुद्धिः सम्पादनीया इति। तत्र च त्रिषु व्यवहारकरणेषु वागपि परिगणिता। सा च **वाक् मनुष्यस्य इतरेभ्यः प्राणिभ्यो विशेषिका**। यतो

वाचं ददतोऽपि केचन इतरे प्राणिनः नैव मनुष्य इव वर्णः पदं वाक्यमिति व्यवस्थितां ताम् उदीरयन्ति । न वा यावता प्रभूतेन प्रमाणेन मनुष्यो वाचम् उपयुङ्क्ते बहुधा, तथा ते कुर्वन्ति । तस्मात् मनुष्यो वाचि शुद्धिम् अवश्यं सम्पादयेत् ।

अपि चेदमत्र अवश्यम् अनुसन्धेयम् । मनुष्यस्य नानाविधानां लौकिकवैदिकीनां सम्भवन्तीनां **वाचां मन्त्रोच्चारणमेव प्रशस्यतमम्** । तेषु हि महात्मभिः दृष्टेषु उच्चारितेषु मन्त्रेषु शब्दरूपेष्वेव सङ्क्रान्ता अस्ति तेषां महात्मनां तपःशक्तिः, मन्त्रोक्तानां च देवतानाम् अनुग्रहशक्तिः । न हि तान् शब्दान् विना अन्यः कश्चित् सम्बन्धो दृश्यते उच्चारयतो मानुषस्य, दृष्टवत ऋषेः, प्रतिपाद्यमानायाश्च देवतायाः परस्परम् ।

तस्मात् अर्थमहिमनि सत्यपि **शब्दस्यैव मन्त्रेषु प्रथमो महिमा** इति सम्मतं साम्प्रदायिकानाम् । तस्मात् शब्दानां शुद्धं स्वरूपं यद्येव वयं संरक्षन्त उच्चारयेम, तर्ह्येव मन्त्राणां शक्तिं कृत्स्नां सफलयेमहि । तस्य च शुद्धस्य रूपस्य संरक्षणार्थम् अवगमनं शास्त्रादस्मादेव भवति, नान्यथा अन्यस्माद्वा ।

यद्यपि श्रद्धया गुरुपरम्परातो मन्त्रान् गृह्णन्तः तेषामुच्चारणं यथावदेव प्रायो गृह्णन्ति, तथापि शास्त्रसेतुबन्धं विना अस्य उच्चारणसमुद्रस्य शुद्धतावेलाया अनतिक्रमः मुक्तसंशयम् आख्यातुम् आशासितुमपि वा न शक्यते । अन्येष्वपि हि शास्त्रेषु तुल्यैव गतिरेषा, यथा व्याकरणे । तथाहि शुद्धान् शब्दान् शिष्टेभ्यो गृह्णन्तोऽपि व्युत्पित्सवः व्याकरणम् अधीत्यैव असन्देहादीनि प्रयोजनानि आसीदन्ति । एवं शुद्धान् वर्णान् परम्परया गृह्णन्तोऽपि **वर्णेषु असन्देहादिकं शिक्षयैव प्राप्नुवन्ति** । तस्मात् व्याकरणे इव इहापि यत्नः अवश्यकार्यः ।

अपि च व्याकरणात् प्रागेव इह विधेयः प्रयत्नः । तथाहि – त्रिकरणशुद्धौ प्राप्तव्यायां वाचः शुद्धिस्तावत् बहुधा व्यवतिष्ठते – वर्णशुद्धिः पदशुद्धिः वाक्यशुद्धिः अर्थशुद्धिः अनुद्वेगकरत्वादिगीतोक्तगुणवत्ता (गी० १७-१५) चेत्येवम् । तत्र शब्दविषये सर्वप्रथमा शुद्धिः वर्णशुद्धिरेव । वर्णेषु हि अधिगतेषु तदवयवकत्वेन तन्निष्पाद्यानि तदधीनानि च पदानि सम्यग् अधिगम्येरन् । न हि गकारस्य स्वरूपं निश्चितम् अजानानः 'गौः गावौ गावः' इति विभक्तीः रटन्नपि गोशब्दं प्रजानातीति शक्यं न्यायेन वक्तुम् ।

अपि च व्याकरणे सन्ध्यादीन् वर्णविषयान् वर्णधर्मपुरस्कारेणैव अन्वाचक्षते वैयाकरणाः । तस्मादपि प्रागेव व्याकरणात् शिक्षाशास्त्रम् अध्येयमिति स्थितिः । एवं च 'प्रधानं च

षट्सु अङ्गेषु व्याकरणम्' इति महाभाष्यकारेण अभिष्टुतस्य, **सर्वशास्त्रोपकारकत्वेन प्रसिद्धस्य च व्याकरणस्यापि इदं शास्त्रमेव उपकारकं**, प्रवेशयोग्यतादातृ चेति अवश्यं शब्दं जिज्ञासमानेन वर्णा जिज्ञासितव्या इति।

सा च जिज्ञासा अस्मादेव शास्त्रात् शाम्यतीत्युक्तम्। इदमेकमेव हि शास्त्रं वर्णनिष्पत्तौ हेतून् विविच्य प्रतिपादयति। येऽपि व्याकरणग्रन्थेषु स्थानप्रयत्नादिविषयाः प्रतिपादिताः तेऽपि अस्मादेव शास्त्रादुद्धृताः तत्रत्यकार्यनिमित्तं, न तु तैरपूर्वतया पूर्णतया वा ते उक्ताः।

ततश्च **इदमेव शास्त्रम् 'एवमेव वर्णाः उच्चारणीयाः' इत्येतं नियमम् अवगमयितुम् अलम्**। यश्चासौ नियमः एतच्छास्त्राध्ययाद् अवसीयते, तन्नियमस्थं वर्णोच्चारणं साधु, इतरत् असाधु। साधूनामेव वर्णानाम् उच्चारणं यदि परिपाल्यते सैव वाचो वर्णशुद्धिरित्युच्यते। **वर्णशुद्धेः प्रयोजनं तु धर्मोत्पत्तिद्वारा श्रेयोऽवाप्तिरिति** पूर्वोक्तमेव।

एवं च अस्य शास्त्रस्य साक्षात्प्रयोजनं वर्णधर्मपरिज्ञानद्वारा वाचि वर्णशुद्धिप्राप्तिः इति, परम्पराप्रयोजनं च निःश्रेयसम् इति सिद्धम्। तदर्थम् इयं शिक्षा अवश्यम् अध्येया भवति॥

* * *

ॐ

॥ पुस्तके आश्रितानां लेखनवैचित्र्याणां विषये सूचना ॥

अत्र पुस्तके लेखिष्यमाणेषु सूत्रेषु कृत्स्ने चास्मिन् पुस्तके [ ] इति चिह्नाभ्याम् उभयतोगृहीतानि अ आ इत्यादीनि वर्णचिह्नानि तत्रतत्र लिख्यन्ते । तत्र तेषां वर्णानां श्रुतिमात्रं विवक्षितं ज्ञेयम् । वर्णश्रुतेः व्याख्यानं च अनुपदमेव करिष्यते । अ आ इत्यादिना वर्णचिह्नेन सूचितस्य ह्रस्वत्वादेः कालविशेषस्य तु न विवक्षा, श्रुतिषु कालपरिच्छेदाभावात् । तस्मात् तत्र कालविषये याथाकामी स्याद् उच्चारणे ।

वर्णान् सूचयितुं प्रवृत्तया लिप्या श्रुतीनां सूचनं कारयितुम् अयम् उपाय आश्रितः । अभ्यर्थये यत् अस्यैव उपायस्य आश्रयणं वर्णश्रुतिसूचनाय सर्वत्र नव्यायाम् अस्यां शिक्षापद्धतौ क्रियतां, ऐकरूप्याय शास्त्राभिवृद्धये चेति ।

अपि च [ ] इति चिह्नयोः मध्ये श्रुतिनिर्देशे क्रियमाणे '*' इति नक्षत्रचिह्नेन अज्झक्त्याख्यः ऋकारादिस्वरांशो विवक्ष्यते । तस्य चिह्नान्तराभावात् एवं स्वीकृतम् । जिह्वामूलीयोपध्मानीययोश्च यद्यपि लोके ≍ इत्येकमेव चिह्नम् उपयुज्यते, तयोः पार्थक्येन ज्ञानाय ≭ इति जिह्वामूलीयः, ≍ इत्युपध्मानीय इति च क्वचिद् दृष्टा व्यवस्था नियततया आश्रिता । इमेऽपि नियमाः असन्देहाय नियततया अनुसर्तुम् उचिता इति विज्ञाप्यते ॥

* * *

ॐ

॥ सूत्रपाठः ॥

१. अथ शिक्षायां प्रथमा क्लृप्तिः।

२. वर्णान् व्याख्यास्यामः।

३. पदचरमावयवो वर्णः।

४. वर्णश्रुतिरेकाऽनेका वा कालपरिच्छिन्ना।

५. [अ आ इ उ '*' ए ओ] इति सप्त स्वराणां श्रुतयः।

६. [क् ख् ग् घ् ङ् च् छ् ज् झ् ञ् ट् ठ् ड् ढ् ण् त् थ् द् ध् न् प् फ् ब् भ् म्] इति पञ्चविंशतिः स्पर्शानाम्।

७. [य् व् ल्] इति तिस्रोऽन्तस्स्थानाम्।

८. [र्] इत्येका रेफस्य।

९. [ऽ श् ष् स् ऽ] इति पञ्चोष्मणाम्।

१०. इति चतुस्त्रिंशद् व्यञ्जनानाम्।

११. [ह् ':'] इति द्वे केवलकण्ठ्ययोः।

१२. ['.'] इत्येकाऽनुस्वारस्य।

१३. इति तिस्र उपस्वराणाम्।

१४. इति चतुश्चत्वारिंशत् सर्ववर्णानाम्।

१५. अथ श्रुतीनां धर्मतो निरुक्तिः।

१६. अनुप्रदानं प्राण आनुनासिक्यं संसर्ग इति साधारणा धर्माः।

१७. स्थानकरणे व्यञ्जनानां विशेषौ।

१८. जिह्वाहन्वोष्ठविन्यासा इतरासाम्।

१९. अथ साधारणाः।

२०. कण्ठे वायुसमीरणाद् उत्पन्नो ध्वनिरनुप्रदानम्।

२१. तद् द्विधा, नादः श्वासश्चेति।

२२. संवृते कण्ठे समीराणे वायौ कम्पनम् उत्पद्यते, स घोषः, तद्वान् ध्वनिर्नादः।

२३. विवृते कण्ठे घोषाभाववान् ध्वनिः श्वासः।

२४. प्रथमद्वितीयस्पर्शानाम् ऊष्मणां विसर्गस्य च श्वासोऽनुप्रदानम्।

२५. इतरासां नादः।

२६. समीराणवायुपरिमाणं प्राणः।

२७. द्वितीयचतुर्थस्पर्शानाम् ऊष्मणां केवलकण्ठ्ययोश्च स महान्।

२८. इतरासाम् अल्पः।

२९. नासिकया वायोः संस्कार आनुनासिक्यम्।

३०. पञ्चमस्पर्शानाम् अनुस्वारस्य च।

३१. वा स्वराणाम् अन्तस्स्थानां च।

३२. इतरासां न।

३३. आस्यावयवयोः सम्बन्धः संसर्गः।

३४. यस्मिन् येन ते स्थानकरणे।

३५. स पञ्चधा, स्पृष्टं रिफितम् ईषद्विवृतम् ईषत्स्पृष्टं विवृतं चेति।

३६. स्पर्शानां स्पृष्टं, तत्र करणं सर्वदेशेन स्थानं स्पृशति।

३७. रेफस्य रिफितं, तत्र करणम् असकृत् स्थानम् आहन्ति।

३८. ऊष्मणाम् ईषद्विवृतं, तत्र करणं स्थानस्यातिसमीपं नीयते।

३९. अन्तस्स्थानाम् ईषत्स्पृष्टं, तत्र करणम् अल्पदेशेन स्थानं स्पृशति।

४०. तद् द्विधा, अन्ततो मध्यतश्च।

४१. यवयोरन्ततईषत्स्पृष्टं, तत्र करणम् अन्ताभ्यां स्थानं स्पृशति।

४२. लस्य मध्यतईषत्स्पृष्टं, तत्र करणं मध्येन स्थानं स्पृशति।

४३. व्यञ्जनेतरेषां न सम्बन्धः, तद् विवृतम्।

४४. अथ व्यञ्जनानां विशेषौ।

४५. कोमलतालु तालु मूर्धोत्तरदन्ता ओष्ठौ च स्थानानि।

४६. कवर्गजिह्वामूलीययोः कोमलतालु।

४७. चवर्गयशानां तालु।

४८. टवर्गरषाणां मूर्धा।

४९. तवर्गवलसानाम् उत्तरदन्ताः।

५०. पवर्गोपध्मानीययोरोष्ठौ।

५१. जिह्वामूलं जिह्वामध्यं जिह्वाग्रम् ओष्ठौ च करणानि।

५२. कोमलतालुनि स्थाने जिह्वामूलं करणम्।

५३. तालुनि जिह्वामध्यम्।

५४. मूर्ध्नि प्रतिवेष्टितं जिह्वाग्रम्।

५५. उत्तरदन्तेष्वृजु।

५६. वकारस्य त्वधरोष्ठः।

५७. ओष्ठयोरोष्ठावेव।

५८. अथ व्यञ्जनेतरेषां विशेषाः।

५९. हकारस्य परस्वरश्रुतिवत् तदभावे [अ] इतिवत्।

६०. विसर्गस्य पूर्ववत्।

६१. [अ आ] इत्यनयोरनुस्वारस्य च जिह्वा प्रण्यस्ता।

६२. [उ ओ] इत्यनयोर्जिह्वामूलं कोमलतालुसमीपे तिष्ठति।

६३. [इ ए] इत्यनयोर्जिह्वामध्यं तालुसमीपे।

६४. ['*'] इत्यस्यां जिह्वाग्रं बर्त्वसमीपे।

६५. अनुस्वारस्याधरा हनुरुत्तरां स्पृशति।

६६. [अ इ उ '*'] इत्यासु तस्याः समीपे तिष्ठति।

६७. [आ ए ओ] इत्यासु ततो दूरे।

६८. [उ ओ] इत्यनयोरोष्ठौ संवृतौ दीर्घौ च।

६९. इतरास्वक्रियौ।

७०. अथ कालः।

७१. होराया अष्टादशाहतसहस्रतमो भागो मात्रा।

७२. एका द्वे तिस्रो मात्रा ह्रस्वो दीर्घः प्लुतः।

७३. अथैकश्रुतयो वर्णाः।

७४. [अ] इत्यस्या ह्रस्वेन।

७५. [आ ए ओ] इत्यासां दीर्घप्लुताभ्याम् ।

७६. [इ उ] इत्यनयोस्त्रिभिरपि ।

७७. स्वरेतरेषाम् अर्धमात्रया ।

७८. अथानेकश्रुतयो वर्णाः ।

७९. ऋ ॠ ऋ॒(३) इति त्रिकालाः स्वराः ।

८०. ऌ ॡ ऌ॒(३) इति ह्रस्वप्लुतकालौ ।

८१. एष्वादौ मात्रापादम् ['*'] इत्येषा ।

८२. ततो मात्रार्धं त्रिषु रेफस्य द्वयोर्लकारस्य ।

८३. ततः शेषम् आदाविव ।

८४. ऐ औ इति दीर्घकालौ ।

८५. ऐ(४) औ(४) इति चतुर्मात्रौ प्लुताख्यौ ।

८६. एष्वादौ मात्राम् [आ] इत्येषा ।

८७. ततो दीर्घ एकां मात्राम् [इ उ] इत्येते ।

८८. प्लुते तिस्रः ।

८९. इति नवपञ्चाशद् वर्णाः संस्कृताः ।

९०. इति शिक्षायां प्रथमा क्लृप्तिः प्रथमा क्लृप्तिः ॥

* * *

ॐ

अथ अर्थप्रकाशप्रकाशितार्था शिक्षाप्रथमकृप्तिः प्रारभ्यते ।।

।। प्रथमं प्रकरणम् – वर्णश्रुतीनां तद्धर्माणां च परिचयः ।।

*

❋ ।। अथ शिक्षायां प्रथमा कृप्तिः ।। १ ।। ❋

श्रुतीनां च परिच्छित्तिं कालयोगं च निर्दिशन् ।
अवतान्नः परः शम्भुः शब्दशास्त्रप्रवर्तकः ।।

सूत्रे अथशब्दो मङ्गलार्थः । तथा च प्राचीनानाम् उक्तिः –

ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ।।

ग्रन्थानाम् आदौ क्रियमाणेन मङ्गलेन प्रकृतस्य शास्त्रस्य तदध्येतॄणां च शुभं भवतु इत्याशास्यते । अत्र प्रकृतं शास्त्रं शिक्षानाम्ना अभिहितम् ।

कोऽस्य शास्त्रस्य विषयः ? वर्णाः । ये पदानाम् अवयवाः शब्दरूपाः पदानि भूत्वा अर्थप्रतिपादनाय लोके उपयुज्यन्ते ते वर्णाख्याः पदावयवाः उच्यन्ते । तत्रापि महादेवपरमेश्वरानुगृहीतेन पाणिनिना मुनिवरेण शास्त्रतः संस्कृताया एव भाषायाः वर्णा एतद्ग्रन्थविषयः । तस्मात् तत्सम्बद्धा एव वर्णधर्मा व्याख्यायन्ते ।

किञ्चास्य अध्ययने ज्ञाने च प्रयोजनम् ? वर्णस्वरूपविवेकः, ततः साधुतया वर्णानाम् उच्चारणं, ततो मन्त्रादौ वाग्विषये वर्णशुद्धिः ।

अथ कोऽस्मिन् शास्त्रे अधिकारी ? ये के च श्रद्धान्विताः साधुतया वर्णान् प्रयोक्तुमिच्छेयुः ते सर्वे एव अत्र अधिकारिणः । किञ्च कस्यापि शास्त्रान्तरस्य ज्ञानं नापेक्षते शिक्षा । सर्वाणि तु शास्त्रान्तराणि शिक्षाम् अपेक्षन्ते । शब्दाश्रयो हि सर्वशास्त्रव्यवहारः । तद्यदि शब्दाः शुद्धा न स्युः, अर्थसौष्ठवेऽपि न सर्वतःसौष्ठवं सम्पादितं भवेत् । तस्मात् शिक्षा न केवलं शास्त्रान्तरात् प्राक् अध्येतुं शक्या, प्रत्युत सर्वप्रथमम् अध्येतव्या एव भवति ।

ईदृशीं शिक्षां ये अध्येतुम् इच्छन्ति तेषामर्थे शिक्षायां प्रथमा कृप्तिः सम्पाद्यते उपदेशेन

इति सूत्रार्थः।

अथ किमिदं प्रथमा क्लृप्तिरिति ? उच्यते। क्लृप्तिरित्यस्य तावत् सामर्थ्यम् इत्यर्थः। शिक्षायां च तदेव सामर्थ्यं, यत् साधुवर्णोच्चारणविषयकं कौशलं वर्णधर्मविषयकेण विवेकेन जायते। तच्च कौशलं सम्पादयत्ययं ग्रन्थः, तदर्थं ज्ञेयानां सर्वेषां धर्माणां पूर्णतया विविच्य प्रतिपादनेन। तस्मादयं ग्रन्थः क्लृप्तिहेतुत्वात् क्लृप्तिरित्युक्तः।

इदं तु अत्र वक्तव्यम्। अस्य एकस्य ग्रन्थस्य अध्ययनेन न समग्रः शिक्षाशास्त्रसागर एव तीर्णो भवति। नीरन्ध्रा नौस्तु प्रदीयते, उपयुज्यतां तरणायेति। तस्मात् प्राथमिकप्रवेशार्थ एवायं ग्रन्थः। अतो नैषा आत्यन्तिकी क्लृप्तिः, अपि तु प्रथमैव क्लृप्तिः॥

अस्यां प्रथमायां क्लृप्त्यां किमुपदिश्यते इत्यत्राह –

❋ ॥ वर्णान् व्याख्यास्यामः ॥ २ ॥ ❋

को नाम वर्णः ? तदाह –

❋ ॥ पदचरमावयवो वर्णः ॥ ३ ॥ ❋

प्रसिद्धानि पदानि। यथा 'हरिः' 'हरिभ्याम्' इति। तत्र 'हरि - :' 'हरि - भ्याम्' इति अवयवान् प्रदर्शयन्ति वैयाकरणाः। तेषामपि यदि अवयवाः परीक्ष्येरन्, चरमतया 'ह् अ र् इ :' 'ह् अ र् इ भ् य् आ म्' इत्येते लभ्यन्ते, ते तत्र वर्णा भवन्ति। एवमन्येष्वपि पदेषु वर्णा उन्नेयाः॥

इति तावत् लोकप्रसिद्धिम् अवलम्ब्य परिचयमात्रार्थम् उक्तम्। परन्तु ऋ ॡ ऐ औ इत्यादीनां केषाञ्चन वर्णानां पुनः अन्ये अवान्तराः अवयवाः सन्तीति दर्शयिष्यामः। तस्मात् तेषु वर्णेषु चरमावयवत्वं नास्ति इत्यतः इदं वास्तवं लक्षणं न भवति। तस्मात् अधुना पारमार्थिकं वर्णलक्षणम् आह –

❋ ॥ वर्णश्रुतिरेकाऽनेका वा कालपरिच्छिन्ना ॥ ४ ॥ ❋

वाशब्दः एवार्थे। 'वर्णः' इत्यनुवर्तते। (पूर्वस्मात् सूत्राद् अत्रापि आनीयते इत्यर्थः।) एका अनेका वा वर्णश्रुतिः यदा कालेन परिच्छिन्ना कालविशेषपरिमाणवती भवति, सा एव एका अनेका वा एको वर्णो भवति।

वर्णश्रुतेः परिचयः तावत् क्रियते। यावन्ति वर्णेषु परस्परविलक्षणानि शब्दस्वरूपाणि

श्रूयन्ते ता वर्णश्रुतयः।

अ आ इ ई उ ऊ इत्येते वर्णाः परिशील्यन्ताम्। अत्र अ आ इत्यनयोः वर्णयोः श्रूयमाणे स्वरूपे परस्परं विलक्षणे अनुभूयेते। तस्मात् तत्र द्वे वर्णश्रुती स्तः इत्यङ्गीक्रियते। एते वर्णश्रुती [अ] [आ] इति च लिख्येते।

इ ई इत्यनयोस्तु श्रूयमाणं स्वरूपं समानम्। तन्नाम समानैः उच्चारणप्रयत्नैः निष्पादितं समानं शब्दस्वरूपं कालभेदमात्रेण इ ई इति द्वौ वर्णौ भवति। ततः तत्र एका एव वर्णश्रुतिः। सा च [इ] इति लिख्यते। एवम् उ ऊ इत्यनयोः वर्णयोः समाना श्रुतिः [उ] इति लिख्यते।

एवं विविच्य लिपिचिह्नादिकं विस्मृत्य श्रोत्रेण शब्दस्वरूपं परिशील्य श्रुतयो ज्ञेयाः भवन्ति। तथा निर्णीय च एषु सूत्रेषु चतुश्चत्वारिंशद् वर्णश्रुतयः उपदिश्यन्ते।

इदं चात्र द्रष्टव्यम्। वर्णश्रुतीनां स्वरूपे कालपरिमाणं नास्ति। तन्नाम यथा वर्णस्य स्वरूपे एका मात्रा द्वे मात्रे इत्यादि वक्ष्यमाणरूपं कालपरिमाणं वर्तते एवम् एतावत्कालयुक्तमेव शब्दस्वरूपं वर्णश्रुतिः भवति इति नास्ति। वर्णगतविलक्षणशब्दस्वरूपमात्रं वर्णश्रुतिः।

एवं स्वरूपतः कालापरिच्छिन्ना अपि वर्णश्रुतिः यदा कश्चित् कालविशेषं यावत् उच्चार्यते श्रूयते च, तदा सैव वर्णो भवति। यथा [इ] इत्येषा इवर्णश्रुतिः एकमात्रादिभिः कालविशेषैः उच्चार्यमाणा श्रूयमाणा च 'इ' 'ई' 'ई(३)' इत्येवं त्रयो वर्णा भवति।

अत्र दृष्टान्तः। व्रीहिद्रव्यसामान्यम् इति किञ्चिद् वर्तते। द्रोणादिना (अद्यत्वे च 'किलोग्राम्' इत्यादिशब्दवाच्येन) परिमाणविशेषेण परिमितो व्रीहिः इति च किञ्चिद् वर्तते। तत्र व्रीहिसामान्यवद् वर्णश्रुतिः। द्रोणादिपरिमितव्रीहिवच्च एकमात्रादिपरिमिता वर्णश्रुतिः, सैव वर्णः।

अथ यथा व्रीहिसामान्यं द्रोणादिपरिमाणे असति विक्रयणादिव्यवहारयोग्यं न, योग्यं च तस्मिन् सति, एवं वर्णश्रुतिः स्वरूपतो भाषाव्यवहाराय अकल्पमाना अपि कालविशेषपरिमाणे सति वर्णो भूत्वा कल्पते।

यथा च शुद्धस्य सुवर्णस्य द्वाविंशतिः भागाः ताम्रस्य च द्वौ इति संयोज्य आभरणसुवर्णं क्रियते, एवम् अनेकाऽपि वर्णश्रुतिः प्रत्येकं कालविशेषं प्राप्य सम्भूय एको वर्णो भवति। तदपि उत्तरत्र विवरिष्यते।

सर्वथा 'एका अनेका वा वर्णाकृतिः कालविशेषपरिच्छिन्ना वर्णः' इति वर्णस्य पारमार्थिकं लक्षणम्। यासां च वर्णश्रुतीनां यथा कालपरिच्छेदे वर्णा जायन्ते तदत्र ग्रन्थे

निरूप्यते। तेन वर्णव्याख्यानप्रतिज्ञा पूर्यते ॥

अथ वर्णश्रुतीः उच्चार्य प्रदर्शयिष्यति अनन्तरेषु सूत्रेषु। तेषु च पठ्यमानेषु अत्र पुस्तके सूत्रपाठसङ्ग्रहात् पूर्वं दत्ता सूचना [ ] इत्यादिचिह्नोपयोगविषयिणी न विस्मर्तव्या।

❋ ॥ [अ आ इ उ '*' ए ओ] इति सप्त स्वराणाम् श्रुतयः ॥ ५ ॥ ❋

अ आ आ(३) इत्यादयो वर्णाः स्वरा इति लोके प्रसिद्धाः। तेषाम् इमाः सप्त श्रुतयः। आभिः श्रुतिभिः कालविशेषपरिमाणवतीभिः लोकप्रसिद्धाः स्वराः व्याख्यास्यन्ते ग्रन्थान्ते। ['*'] इत्येषा च अज्भक्तिश्रुतिः इत्युच्यते। अज्भक्तिनामकस्य हि ऋकारादीनां स्वरांशस्य एषा श्रुतिः। इदमपि उत्तरत्र स्पष्टं भविष्यति ॥

❋ ॥ [क् ख् ग् घ् ङ् च् छ् ज् झ् ञ् ट् ठ् ड् ढ् ण् त् थ् द् ध् न् प् फ् ब् भ् म्] इति पञ्चविंशतिः स्पर्शानाम् ॥ ६ ॥ ❋

'श्रुतयः' इत्यनुवर्तते १४ सूत्रपर्यन्तम्। पञ्चविंशतेः प्रसिद्धानां स्पर्शानां प्रत्येकम् एकैका श्रुतिः। तत्र स्पर्शानां विषये लोके प्रसिद्धः कवर्गादिव्यवहारः प्रथमद्वितीयादिव्यवहारश्च अस्मिन् ग्रन्थेऽपि उपादीयते ॥

❋ ॥ [य् व् ल्] इति तिस्रोऽन्तस्स्थानाम् ॥ ७ ॥ ❋

अत्र ग्रन्थे इमाः तिस्र एव अन्तस्स्थानां श्रुतयः इति प्रतिज्ञायते। तेन य् व् ल् इति त्रय एव वर्णाः अत्र अन्तस्स्थाशब्देन अभिप्रेता इति गम्यते। लोके यद्यपि रेफोऽपि अन्तस्स्थात्वेन परिगणितः। अस्य ग्रन्थस्य व्याख्यानरीतौ तु स पृथक्कृतः, तस्य च श्रुतिः पृथग् उपदिश्यते –

❋ ॥ [र्] इत्येका रेफस्य ॥ ८ ॥ ❋

❋ ॥ [ऽ श् ष् स् ऽ] इति पञ्चोष्मणाम् ॥ ९ ॥ ❋

ऽ इति जिह्वामूलीयः, ऽ इत्युपध्मानीयः इत्युक्तं न विस्मर्तव्यम्। अत्र ग्रन्थे इमाः पञ्च ऊष्मणां श्रुतयो भवन्ति इति प्रतिज्ञायते। तेन पूर्ववत् ऽ श् ष् स् ऽ इत्येते पञ्चैव वर्णा अत्र ऊष्मशब्देन अभिप्रेता इति गम्यते। हकारोऽपि ऊष्मा, ऽ ऽ इत्येतौ तु न – इत्येषा लोकप्रसिद्धिः परित्यक्ता ॥

❋ ॥ इति चतुस्त्रिंशद् व्यञ्जनानाम् ॥ १० ॥ ❋

अनन्तरोक्ताः चतुस्त्रिंशद् व्यञ्जनानां श्रुतयः । इदं सूत्रं व्यञ्जनसंज्ञानियमार्थम् – स्पर्शाः अन्तस्स्थाः रेफः ऊष्माणश्चेति अनन्तरोक्तान्येव व्यञ्जनानि, व्यञ्जनान्येव चेति । तेन लोकप्रसिद्धं हकारस्य व्यञ्जनत्वमिह नास्ति, लोकाप्रसिद्धं च ऽ८ ५ इत्यनयोः व्यञ्जनत्वमिह अस्ति । तदेतत् यत्रास्मिन् ग्रन्थे व्यञ्जनशब्दः प्रयुज्यते १७ सूत्रादौ तत्र स्मर्तव्यम् ॥

❋ ॥ [ह् ':'] इति द्वे केवलकण्ठ्ययोः ॥ ११ ॥ ❋

हकारविसर्गौ अत्र केवलकण्ठ्यौ इत्युक्तौ, यतस्तौ केवलेन कण्ठेन, तन्नाम कण्ठातिरिक्ते शरीरावयवे प्रयत्नम् अनपेक्ष्य, उच्चार्येते । तयोरिमे द्वे श्रुती ॥

❋ ॥ [ं] इत्येकाऽनुस्वारस्य ॥ १२ ॥ ❋

❋ ॥ इति तिस्र उपस्वराणाम् ॥ १३ ॥ ❋

केवलकण्ठ्ययोः अनुस्वारस्य च उपस्वराः इति संज्ञा विधीयते । किमर्थम् ? उच्यते । त्रय एते वर्णाः व्यञ्जनगणात् पृथक्कृताः अस्माभिः । तत्र च कारणं तेषां व्यञ्जनेभ्यो वैलक्षण्यम् । स्वरैश्च एषां सादृश्यं वर्तते, यद्यपि लोके स्वरत्वेन प्रसिद्धिः नास्ति । तस्मात् स्वरसदृशा अमी वर्णा इति ज्ञापनार्थम् उपस्वराः इति संज्ञा कृता ॥

❋ ॥ इति चतुश्चत्वारिंशत् सर्ववर्णानाम् ॥ १४ ॥ ❋

इदं सूत्रं वर्णश्रुतिसङ्ख्यावधारणार्थम् । एताः चतुश्चत्वारिंशद् एव श्रुतयः सर्ववर्णान् कुर्वन्ति । यद्यपि वर्णाः नवपञ्चाशद् इति ग्रन्थान्ते वक्ष्यति । तथापि अस्यामेव चतुश्चत्वारिंशति काश्चन श्रुतयः कालादिभेदेन बहून् वर्णान् कुर्वन्तीति सङ्ख्या पूर्यते । तथा चान्ते स्पष्टं भविष्यति ॥

एवं वर्णश्रुतीः प्रदर्श्य तदीयधर्माणां निर्वचनेन तासां स्वरूपनिर्वचनं प्रतिजानीते –

❋ ॥ अथ श्रुतीनां धर्मतो निरुक्तिः ॥ १५ ॥ ❋

अतः परं श्रुतयः तद्धर्मनिर्वचनेन निरुच्यन्ते । अत्रत्यं च 'श्रुतीनाम्' इति षष्ठ्यन्तं पदं ६९-सूत्रपर्यन्तं यथायोग्यं सर्वत्र सम्बध्यते । तस्माद् वर्णानां धर्माः कथ्यन्ते इति भ्रान्तिं वारयित्वा वर्णश्रुतीनामेव धर्मा उच्यन्ते इति स्मर्तव्यम् । वर्णश्रुतिधर्माः परम्परया वर्णधर्मा भविष्यन्तीति

अन्यदेतत् । अस्मिन् ग्रन्थे आश्रिते निरूपणक्रमे इमे वर्णश्रुतीनामेव धर्मा इति विवक्षिताः । एतदेव स्मारयितुम् 'इतरासाम्' 'अस्याम्' इत्यादिरूपः स्त्रीलिङ्गप्रयोगः यथासम्भवं कृतः ॥

❋ ॥ अनुप्रदानं प्राण आनुनासिक्यं संसर्ग इति साधारणा धर्माः ॥ १६ ॥ ❋

सर्वासां श्रुतीनाम् इमे चत्वारो धर्मा भवन्ति इति साधारणा उच्यन्ते ॥

❋ ॥ स्थानकरणे व्यञ्जनानां विशेषौ ॥ १७ ॥ ❋

व्यञ्जनानां याः श्रुतयः तासाम् इमौ द्वौ विशेषौ धर्मौ भवतः । साधारणैश्च चतुर्भिः सह व्यञ्जनश्रुतीनां षड् धर्माः । प्रतिव्यञ्जनश्रुति विस्पष्टं स्वरूपनिरूपणाय षण्णाम् एषां धर्माणां कथनम् अपेक्षितं च पर्याप्तं च ॥

❋ ॥ जिह्वाहन्वोष्ठविन्यासा इतरासाम् ॥ १८ ॥ ❋

इतरासां श्रुतीनां – व्यञ्जनश्रुतिभिन्नानां स्वरश्रुतीनाम् उपस्वरश्रुतीनां चेत्यर्थः – त्रयो विशेषधर्माः जिह्वायाः हन्वाः ओष्ठयोश्च विन्यासाः इति । साधारणैश्च चतुर्भिः सह व्यञ्जनेतरश्रुतीनां प्रत्येकं विस्पष्टव्याख्यानाय सप्तानाम् एषां धर्माणां कथनम् अपेक्षितं च पर्याप्तं च ॥

तेऽमी श्रुतिधर्माः कालसंयुक्ताः श्लोकेषु सङ्गृह्यन्ते –

अनुप्रदानं प्राणश्चाप्यानुनासिक्यमेव च । संसर्गश्चेति चत्वारो धर्माः सर्वश्रुतिस्थिताः ॥
व्यञ्जनानां श्रुतौ स्थानकरणे द्वौ विशेषकौ । जिह्वाहन्वोष्ठविन्यासाः स्वरोपस्वरयोस्त्रयः ॥
इत्थं षड्भिः सप्तभिर्वा श्रुतीर्व्याख्याय तत्त्वतः । तत्र कालस्य योगेन वर्णान् ब्रूयाद् बुधोत्तमः ॥
अप्रमत्तः श्रुतेर्धर्मान् कालयोगं च यः स्मरेत् । वर्णानां लक्षणं वक्तुं समर्थः सैव वर्णवित् ॥

* * *

ॐ

।। द्वितीयं प्रकरणम् – साधारणानां वर्णश्रुतिधर्माणां व्याख्यानम् ।।

*

अधुना तान् सर्वान् धर्मान् व्याचिख्यासन् आदौ साधारणधर्माणां व्याख्यानं प्रतिजानीते –

❋ ।। अथ साधारणाः ।। १९ ।। ❋

'धर्माः व्याख्यायन्ते' इति शेषः । अत्र श्रुतिधर्मनिरूपणप्रकरणे प्रतिधर्मं लक्षणं प्रभेदाः लक्ष्याणि चेति अंशत्रयमुच्यते तदनुसन्धेयम् ।।

तत्र तावत् प्रथमः साधारणो धर्म उपन्यस्यते –

❋ ।। कण्ठे वायुसमीरणाद् उत्पन्नो ध्वनिरनुप्रदानम् ।। २० ।। ❋

यदा मनसि विवक्षा जायते तदा शारीरप्राणशक्तिप्रेरणया वायुः श्वासकोशस्थः ऊर्ध्वमुत्क्रामति । स तत उत्थितः यदा कण्ठदेशमागत्य तत्र समीर्ते तदा तत्र वर्तमानाभ्यां घोषतन्त्रीभ्यां तस्य प्रथमः संस्कारो भवति । (उत्तरत्र दत्तं चित्रं वीक्ष्यताम् ।) तादृशात् संस्कारात् जायते यः प्राथमिको ध्वनिः स उच्यते अनुप्रदानमिति ।।

❋ ।। तद् द्विधा, नादः श्वासश्चेति ।। २१ ।। ❋

❋ ।। संवृते कण्ठे समीराणे वायौ कम्पनम् उत्पद्यते, स घोषः, तद्वान् ध्वनिर्नादः ।। २२ ।। ❋


घोषतन्त्र्योः **संवारेण**, अर्थात् सङ्कोचनेन, गलबिलं सङ्कुचितं भवति । तदा कण्ठः संवृत इत्युच्यते । ईदृशे संवृते कण्ठे यदा वायुः समीर्ते, तदा घोषतन्त्र्यौ कम्पेते । वायौ चैष कम्पनधर्मः सङ्क्रामति । स उच्यते **घोष** इति । यश्चायं घोषवान् ध्वनिः, स **नाद** उच्यते । इदं प्रथममनुप्रदानम् ।

घोषः [अ आ] इत्यादिषु स्वरश्रुतिषु, [म् न्] इत्यादिषु पञ्चमस्पर्शश्रुतिषु च स्पष्टम् अनुभवितुं शक्यः अङ्गुल्यग्रेण कण्ठदेशस्य स्पर्शनेन । अन्यत्रापि विद्यते, यथा उत्तरत्र वदिष्यामः । अत्र च सर्वत्र कण्ठशब्दः तत्प्रदेशपरः यत्र घोषतन्त्र्यौ गलबिले वर्तेते ।।

❋ ॥ विवृते कण्ठे घोषाभाववान् ध्वनिः श्वासः ॥ २३ ॥ ❋

यदा कण्ठे **विवारः** विकासः भवति, अर्थात् घोषतन्त्र्यौ विवृते एव भ्रियेते, तदा संवारप्रयुक्तो घोषो नोत्पद्यते इति **अघोषो** भवति । एवं घोषरहितः कण्ठदेशस्थो ध्वनिः **श्वासः** उच्यते । अयं च घोषाभावः श् इत्यादिवर्णेषु अनुभवितुं शक्यः पूर्ववद् अङ्गुल्यग्रेण कण्ठदेशस्य स्पर्शनेन ॥

सेयमनुप्रदानोत्पत्तिः इत्थमनुसन्धेया –



❋ ॥ प्रथमद्वितीयस्पर्शानाम् ऊष्मणां विसर्गस्य च श्वासोऽनुप्रदानम् ॥ २४ ॥ ❋

एषां याः श्रुतयस्तासां श्वासोऽनुप्रदानम् । तासु कण्ठस्य विवृतत्वात् घोषो न भवति ॥


❋ ॥ इतरासां नादः ॥ २५ ॥ ❋

इतरासां श्रुतीनाम् – तन्नाम स्वराणां तृतीयचतुर्थपञ्चमस्पर्शानाम् अन्तस्स्थानां रेफस्य हकारस्य अनुस्वारस्य च श्रुतीनां – नादोऽनुप्रदानं भवति । तासु कण्ठस्य संवृतत्वात् घोषो भवतीत्यर्थः । हकारविसर्गयोः मिथः अनुप्रदानेनैव भेदः इत्यपि प्रसङ्गादुच्यते तत् स्मर्तव्यम् ॥

इत्थं प्रथमः साधारणः श्रुतिधर्मो व्याख्यातः ॥

अत्र प्रसङ्गात् पश्चाद् अपेक्षितत्वाच्च पूर्वस्य चित्रस्य यो मुख्यो भागः उच्चारणोपयोगिनां मुख्यानाम् अङ्गविशेषाणां प्रदर्शकः स विशालीकृत्य सविशेषनिर्देशं प्रदर्शितः । व्याख्यानं चास्य अवधार्यताम् ।

आस्यबिलं तद् येन अन्नं प्राश्नीमः । **नासिकाबिलं** तद् येन श्वसिमः । तयोः सन्धाने विद्यमानं लघु बिलं **नासिकास्थानं** नाम ।



आस्यबिलस्य उपरिप्रावरणं (चर्मभित्तिः) यदस्ति, तस्य सर्वपश्चाद् विद्यमानः प्रदेशः **कोमलतालु** । अयम् अस्थिरहितत्वात् मृदुः भवतीत्यतः कोमलतालु इत्युक्तः । ततः पुरस्तात् अस्थिमान् कठिनो भागः **तालु** इत्युच्यते । उत्तरदन्तपङ्क्तेः प्रत्यक् मांसलप्रदेशाः **बर्स्वाः** उच्यन्ते । तेषां तालुनश्च मध्यभागो **मूर्धा** इत्युच्यते । **उत्तरदन्ताः** प्रसिद्धाः, **ओष्ठौ** च ।

जिह्वायाः त्रयो भागा दर्शिताः – **मूलं मध्यम् अग्रं** चेति ।

अधरा हनुः, घोषतन्त्र्योः प्रदेशः **कण्ठश्च** सूचितः ।

शिक्षां जिज्ञासुभिः चित्रमिदं मनसि सम्यग् निधेयं यथा अदृष्ट्वा स्वयं पुना रचयितुं शक्यते । किञ्च चित्रस्यास्य स्वशरीरस्थैः अवयवैः संवादमपि मनसा अनुसन्दध्यात् ।।

अथ द्वितीयः सर्वश्रुतिधर्मः पठ्यते –

❋ ।। समीराणवायुपरिमाणं प्राणः ।। २६ ।। ❋

यो वायुः कण्ठे समीर्ते तस्य परिमाणं, महद् वा अल्पं वा, प्राण उच्यते ।।

❋ ।। द्वितीयचतुर्थस्पर्शानाम् ऊष्मणां केवलकण्ठ्ययोश्च स महान् ।। २७ ।। ❋

एषां याः श्रुतयः तासां महान् प्राणः । तासु उच्चार्यमाणास्वधिको वायुः उरस उत्क्षिप्तः कण्ठे समीर्ते ।।

❋ ।। इतरासाम् अल्पः ।। २८ ।। ❋

इतरासाम् – स्वराणां प्रथमतृतीयपञ्चमस्पर्शानाम् अन्तस्स्थानां रेफस्य अनुस्वारस्य च श्रुतीनां अल्पः प्राणः । तासु उच्चार्यमाणासु न्यूनो वायुः उरस उत्क्षिप्तः कण्ठे समीर्ते ।।


इति प्राणो नाम द्वितीयः साधारणः श्रुतिधर्मः । अथ तृतीयः पठ्यते –

❋ ।। नासिकया वायोः संस्कार आनुनासिक्यम् ।। २९ ।। ❋

उत्तरस्मिन् पुटे वामचित्रे नासिकास्थानं निरुद्धं दर्शितम् । एवमुच्चारणे उरसः उत्क्रामन् वायुः नासिकाबिलं न प्रवेष्टुं शक्नोति, आस्यबिलमेव च प्रविशति । तदेतत् तत्र बाणचिह्नाभ्यां दर्शितम् । ततः तादृशे स्थले वायुः नासिकया न सम्बध्यते, अतो न तया संस्क्रियते । तस्मात् तत्र आनुनासिक्यं नास्ति । तादृशाः श्रुतयः अननुनासिका उच्यन्ते ।

दक्षिणचित्रे नासिकास्थानं विवृतं दर्शितम् । एवमुच्चारणे वायुः नासिकाबिलमपि

प्रविश्य तत्रापि संस्क्रियते । एतद् बाणचिह्नैः दर्शितम् । अतोऽत्र आनुनासिक्यम् अस्ति । ईदृशाः श्रुतयः अनुनासिका उच्यन्ते ॥



❋ ॥ पञ्चमस्पर्शानाम् अनुस्वारस्य च ॥ ३० ॥ ❋

'आनुनासिक्यम्' इत्यनुवर्तते । 'भवति' इति शेषः । एतद्वर्णश्रुतीनाम् आनुनासिक्यं भवति ॥

❋ ॥ वा स्वराणाम् अन्तस्स्थानां च ॥ ३१ ॥ ❋

एतद्वर्णश्रुतीनाम् आनुनासिक्यं वा भवति । श्रुतिप्रतिज्ञाकाले तु आनुनासिक्यं विनैव उच्चारितम् । [अँ आँ इँ उँ '*ँ' एँ ओँ] इति [यँ वँ लँ] इति च ता एव श्रुतयः रूपान्तरमपि प्राप्नुवन्तीति एतत् सूत्रमाह ॥

❋ ॥ इतरासां न ॥ ३२ ॥ ❋

इतरासाम् – प्रथमद्वितीयतृतीयचतुर्थस्पर्शानां रेफस्य ऊष्मणां केवलकण्ठ्ययोश्च श्रुतीनां – न जातु आनुनासिक्यं भवति ।

अत्रायं प्रश्नः । आनुनासिक्यं कासुचिदेव वर्णश्रुतिषु वर्तते इत्युच्यते, न पुनः सर्वासु । अथ सर्वश्रुतिसाधारणधर्मत्वेन अस्य कथने कोऽभिप्रायः ? उच्यते ।

यास्वपि श्रुतिषु आनुनासिक्यं न वर्तते, तासु तत् न वर्तते इत्येतद् अवश्यं स्मर्तव्यं वक्तव्यं च । अन्यथा तासां श्रुतीनां स्वरूपं न साकल्येन मनसि धारितं भवेत्, परस्मै वा सुष्ठु कथितं भवेत् । यतः 'आनुनासिक्यं नास्ति' इति यदि प्रयत्नेन न स्मर्यते नोच्यते च, तर्हि 'अस्ति वा न वा ?' इति सन्देह उदेतुम् अर्हति । तादृशेषु च सन्देहेषु अवारितेषु शिक्षायां क्लृप्तिः साधिता इति वक्तुं न केनापि शक्येत ।

तस्माद् यद्यपि आनुनासिक्यं न स्वरूपतः सर्वासु श्रुतिषु वर्तते, तथापि तद्भावो वा अभावो वा सर्वासु तासु स्मर्तव्यो वक्तव्यश्च इत्येतत् नियमयितुं सर्वश्रुतिधर्मोऽयम् इत्युक्तम् इति ॥

इति आनुनासिक्यं नाम तृतीयः साधारणः श्रुतिधर्मः । अथ चतुर्थ उच्यते –

❋ ॥ आस्यावयवयोः सम्बन्धः संसर्गः ॥ ३३ ॥ ❋

उच्चारणसम्बन्धि आस्यम् ''ओष्ठप्रभृति प्राक् कण्ठात्'' इति लोके प्रसिद्धम् । (अत्र नासिकावयवा नान्तर्भवन्ति ।) अस्य आस्यस्य अवयवाः कोमलताल्वादयः जिह्वामूलादयश्च २५ पुटस्थे चित्रे दर्शिता एव । इमे पुनः भूयिष्ठानां (व्यञ्जन)श्रुतीनाम् उत्पादने द्वौद्वौ व्याप्रियन्ते । तथा व्याप्रियमाणयोः द्वयोः अवयवयोः यादृशः परस्परेण शब्दोत्पादकः सम्बन्धो भवति स संसर्गः ।

अत्र ''आस्यावयवसम्बन्धः'' इति लघुना वक्तुं शक्ये सति यद् ''आस्यावयवयोः सम्बन्धः'' इति द्विवचनं प्रयत्नेनाह, तद् एतद् वक्तुम् इच्छति – यो व्यञ्जनश्रुतिषु द्वयोरेव अवयवयोः सम्बन्धः, स एवेह सम्बन्ध इति । व्यञ्जनेतरश्रुतिषु पुनः ''जिह्वाहन्वोष्ठविन्यासा इतरासाम्'' इति १८-सूत्रोक्तरीत्या बहवोऽवयवाः व्याप्रियन्ते । तेषां तथा व्याप्रियमाणानाम् अपि कश्चित् सम्बन्धः सम्भाव्येत, परन्तु सोऽत्र सम्बन्धः इति न विवक्षितः । तदेतद् अग्रे ४३ सूत्रे विवृतसंसर्गस्य निरूपणे स्मर्तव्यम् ॥

❋ ॥ यस्मिन् येन ते स्थानकरणे ॥ ३४ ॥ ❋

'सम्बन्धः' इति 'अवयव' इति चानुवर्तते । 'क्रियते' इति शेषः । यस्मिन् अवयवे येन क्रियावता अवयवेन सम्बन्धः क्रियते ते क्रमेण स्थानं करणम् इति चोच्येते । व्यञ्जनश्रुति-विशेषधर्मयोः अप्येतयोः इह लक्षणम् उक्तम्, उत्तरेषु सूत्रेषु व्यञ्जनश्रुतिसंसर्गेषु अपेक्षितत्वात् ॥

❋ ॥ स पञ्चधा, स्पृष्टं रिफितम् ईषद्विवृतम् ईषत्स्पृष्टं विवृतं चेति ॥ ३५ ॥ ❋

'सः' इति संसर्गः परामृश्यते, योग्यत्वात् । स्पष्टमन्यत् ॥


उत्तरैः सूत्रैः पञ्चविधस्य संसर्गस्य स्वरूपं तत्तल्लक्ष्यं चाह –

❋ ॥ स्पर्शानां स्पृष्टं, तत्र करणं सर्वदेशेन स्थानं स्पृशति ॥ ३६ ॥ ❋

स्पर्शानां याः श्रुतयः तासां स्पृष्टं संसर्गः । तत्र च करणस्य सर्वो देशः स्थानं स्पृशति । उत्तरत्र दत्तं चित्रं तावद् दृश्यताम् । तत्र चवर्गश्रुतीनाम् उच्चारणं वामतः प्रदर्श्यते ।

चवर्गश्रुतीनां तालु स्थानं जिह्वामध्यं करणम् इति वक्ष्यते । अनयोः स्थानकरणयोः संसर्गः दक्षिणतो विस्तार्य दर्शितः । तत्रेदं द्रष्टुं शक्यमस्ति यत् स्थानकरणयोः स्पर्शः आवामदक्षिणं पूर्णो वर्तत इति । (चित्रे दत्तं रेखयोः अल्पम् अन्तरं तु तयोः विवेकार्थमेव ।)


ईदृशं सर्वदेशस्पर्शनं स्पर्शवर्णानां श्रुतिषु क्रियमाणासु भवति । सोऽयं स्पृष्टं नाम संसर्गः । अनेन संसर्गेण आस्ये वायुः सर्वात्मना निरुध्यते ॥



❋ ॥ रेफस्य रिफितं, तत्र करणम् असकृत् स्थानम् आहन्ति ॥ ३७ ॥ ❋

रेफस्य श्रुतेः रिफितं संसर्गः । अर्धमात्रे रेफवर्णे यथा द्विः त्रिः वा अतिशीघ्रं करणेन स्थानम् आहन्यते तावता वेगेन रेफश्रुतौ असकृदाहतिरूपं रिफितं क्रियते ।


अस्मिन् रिफिते संसर्गे वक्ष्यमाणयोः स्थानकरणयोः मूर्धजिह्वाग्रयोः अत्याशु संयोगा वियोगाश्च भवन्ति । संयोगेषु वायुर्निरुध्यते, वियोगेषु च निर्याति । तेन रिफितसंसर्गे वायुः निरुद्धोनिरुद्धो निर्याति । तौ च रिफितान्तर्गतौ संयोगवियोगौ इत्थं चित्र्येते –



❋ ॥ ऊष्मणाम् ईषद्विवृतं, तत्र करणं स्थानस्यातिसमीपं नीयते ॥ ३८ ॥ ❋

ऊष्मणां याः श्रुतयः तासाम् ईषद्विवृतं संसर्गः । स्थानकरणे ईषदेव अन्योन्यस्मात् विवृते भवतः इत्यतः अयं संसर्गः ईषद्विवृतम् इत्युच्यते । तेन च वायुः स्थानकरणयोः अन्तरालप्रदेशद्वारा क्लेशेन निर्याति ।

उदाहरणतया चात्र चित्रे शकारश्रुतेः उच्चारणप्रकारो दर्शितः । तत्र जिह्वामध्यं करणं तालुनः स्थानस्य अतिसमीपं नीतं वर्तते ॥



❋ ॥ अन्तस्स्थानाम् ईषत्स्पृष्टं, तत्र करणम् अल्पदेशेन स्थानं स्पृशति ॥ ३९ ॥ ❋

अन्तस्स्थानां याः श्रुतयः तासाम् ईषत्स्पृष्टं संसर्गः । करणस्य अल्पदेशेन स्थानस्य स्पर्शनमेव ईषत्स्पृष्टम् । अत्र वायुः यत्र स्थानकरणयोः संस्पर्शो नास्ति तेन अवकाशेन निर्याति ॥

❋ ॥ तद् द्विधा, अन्ततो मध्यतश्च ॥ ४० ॥ ❋


अन्ततो मध्यत इति अन्तेन मध्येन इत्येतदुक्तं भवति ॥

❋ ॥ यवयोरन्ततईषत्स्पृष्टं, तत्र करणम् अन्ताभ्यां स्थानं स्पृशति ॥ ४१ ॥ ❋


यकारवकारयोः ये श्रुती तयोः अन्ततईषत्स्पृष्टं संसर्गः । उभयोः अनयोः करणस्य अन्तभागेन स्थाने ईषत् स्पर्शनं क्रियते ।

यकारश्रुतौ तावद् युगपदेव करणस्य जिह्वामध्यस्य वामदक्षिणाभ्याम् अन्ताभ्यां तालुनि

स्थाने ईषत् स्पर्शनं क्रियते। यथा –




वकारश्रुतौ तु करणस्य अधरोष्ठस्य बाह्येन आन्तरेण च अन्तेन उत्तरदन्तेषु स्थाने ईषत् स्पर्शनम्। तच्च युगपन्न साध्यमिति परस्परविकल्पेन भवति। यथा –




❋ ॥ लस्य मध्यतईषत्स्पृष्टं, तत्र करणं मध्येन स्थानं स्पृशति॥ ४२ ॥ ❋

करणस्य जिह्वाग्रस्य अल्पेन मध्यभागेन स्थानम् उत्तरदन्ताः ईषत् स्पृश्यते लकारस्य श्रुतौ। तेन तस्या मध्यतईषत्स्पृष्टं संसर्गो भवति। वायुरत्र मध्ये निरुद्धः पार्श्वयोः विद्यमानेन अवकाशेन निर्याति। तद्यथा –



❋ ॥ व्यञ्जनेतरेषां न सम्बन्धः, तद् विवृतम् ॥ ४३ ॥ ❋

व्यञ्जनेतरेषां – स्वराणाम् उपस्वराणां च – याः श्रुतयः तत्र न कयोरपि आस्यावयवयोः परस्परेण सम्बन्धो भवति । अस्मात् सम्बन्धाभावादेव च अत्र वायुः मुखे न निरुध्यते, स्वैरं च निर्याति । इदं विवृतं नाम संसर्गः । यथा इवर्णश्रुतौ –



अत्रेदं द्रष्टव्यम् । व्यञ्जनेतरश्रुतिषु ''कयोरपि आस्यावयवयोः न सम्बन्धः'' इत्युक्तस्य ''सर्वथा सम्बन्धो नास्ति'' इति नार्थः । तत्र तावत् ३३ सूत्रे उक्तं स्मर्तव्यम् । यो व्यञ्जनश्रुतिषु द्वयोरवयवयोः सम्बन्धः स एव संसर्गलक्षणे सम्बन्धशब्देन विवक्षितः । तस्माद् इह व्यञ्जनेतरश्रुतिषु बहूनाम् आस्यावयवानाम् अन्यविधे परस्परेण सम्बन्धे सम्भाव्यमानेऽपि सम्बन्धो नास्तीत्येव उच्यते अत्रत्यप्रक्रियानुसारम् ।

यस्माच्च एवं सम्बन्धो नास्तीति उच्यते, तस्मादेव अस्यां प्रक्रियायां व्यञ्जनेतरश्रुतिषु स्थानकरणे अपि न उच्येते, तयोः ३४-सूत्रोक्तरीत्या तादृशेन सम्बन्धेन निरूप्यमाणत्वात् ।।

अथायं प्रश्नः । प्रक्रियानुसारादू वा केनापि वा हेतुना ''सम्बन्धो नास्ति'' इत्युच्यमाने सम्बन्धात्मकस्य संसर्गस्य असम्भव एव । अथ कथं विवृतं नाम संसर्ग इत्युच्यते ? संसर्गो वा व्यञ्जनेतरश्रुतिषु अवर्तमानः सन् सर्वश्रुतिधर्म इत्युच्यते ?

श्रूयताम् । आनुनासिक्यम् अस्तीति नास्तीति वा सर्वत्र स्मर्तव्यमेव इत्येतत् नियमयितुं तत् सर्वश्रुतिधर्मत्वेन यथा उक्तं, तथा स्पृष्टादयो ये निश्चिताः संसर्गाः तेषाम् अभावोऽपि व्यञ्जनेतरश्रुतीनां स्वरूपनिश्चयाय अवश्यं स्मर्तव्यो वक्तव्यश्च इत्येतत् नियमयितुं संसर्गोऽपि सर्वश्रुतिधर्मत्वेन उक्तः । तस्य च संसर्गान्तराभावस्य व्यवहारसौकर्याय संयोगरहितम् इत्यर्थकं विवृतम् इति नाम कृतं, सोऽपि च संसर्ग इत्युपचरितः ।।

एवं सर्ववर्णश्रुतिसाधारणा धर्मा व्याख्याताः ।।

* * *

ॐ

।। तृतीयं प्रकरणम् – वैशेषिकाणां वर्णश्रुतिधर्माणां व्याख्यानम् ।।

*

एवं साधारणधर्मा उक्ताः। अतः परं विशेषधर्मा उच्यन्ते। तत्र प्रतिजानीते –

❋ ।। अथ व्यञ्जनानां विशेषौ ।। ४४ ।। ❋

'श्रुतीनाम्' इत्यनुवर्तत एव। 'धर्मौ व्याख्यायेते' इति शेषः। १७ सूत्रे 'स्थानकरणे व्यञ्जनानां विशेषौ' इत्युक्तम्। तयोरधुना विवरणं क्रियते। तयोः सामान्यं लक्षणं तावत् 'यस्मिन् येन ते स्थानकरणे' इति ३४ सूत्रे उक्तमेव। तत्र यानि संस्कृतभाषायां स्थानानि तान्याह –

❋ ।। कोमलतालु तालु मूर्धोत्तरदन्ता ओष्ठौ च स्थानानि ।। ४५ ।। ❋

२५ पुटे चित्रे दर्शिताः इमे अवयवाः स्मर्तव्याः स्वशरीरे च अनुसन्धेयाः। अथैषां विनियोगम् आह पञ्चभिः सूत्रैः –

❋ ।। कवर्गजिह्वामूलीययोः कोमलतालु ।। ४६ ।। ❋

❋ ।। चवर्गयशानां तालु ।। ४७ ।। ❋

❋ ।। टवर्गरषाणां मूर्धा ।। ४८ ।। ❋

❋ ।। तवर्गवलसानाम् उत्तरदन्ताः ।। ४९ ।। ❋

❋ ।। पवर्गोपध्मानीययोरोष्ठौ ।। ५० ।। ❋

सर्वत्र 'श्रुतीनाम्' इत्यवश्यं सम्बध्यते। इतरत् स्पष्टम्। अधुना करणान्याह –

❋ ।। जिह्वामूलं जिह्वामध्यं जिह्वाग्रम् ओष्ठौ च करणानि ।। ५१ ।। ❋

इमेऽपि अवयवाः २५ पुटे चित्रे दर्शिताः। एषां विनियोगम् आह –

❋ ।। कोमलतालुनि स्थाने जिह्वामूलं करणम् ।। ५२ ।। ❋

कोमलतालु यासां श्रुतीनां स्थानं तासां – कवर्गजिह्वामूलीययोरित्यर्थः – जिह्वामूलं करणम्। एवमेव उत्तरत्र 'स्थाने' 'करणम्' इति शब्दयोः अनुवृत्त्या अर्थो ज्ञेयः ।।

❋ ॥ तालुनि जिह्वामध्यम् ॥ ५३ ॥ ❋

❋ ॥ मूर्ध्नि प्रतिवेष्टितं जिह्वाग्रम् ॥ ५४ ॥ ❋

प्रतिवेष्टितं वक्रीकृतम् । गजो यद्वत् तुण्डम् अधस्ताद् वक्रीकृत्य तेन भोज्यपदार्थं स्वे आस्ये निक्षिपति तथा मूर्ध्नः स्पर्शनाय जिह्वाग्रम् उपरिष्टात् प्रतिवेष्टनीयम् । तदेतत् चित्रेषु दर्शयिष्यते, दर्शितं च रिफितसंसर्गे ॥

❋ ॥ उत्तरदन्तेष्वृजु ॥ ५५ ॥ ❋

'जिह्वाग्रम्' इत्यनुवर्तते । ऋजु इत्यवक्रमुच्यते । मूर्ध्नि स्थाने जिह्वाग्रं प्रतिवेष्टितं भवेत् । उत्तरदन्तेषु तु स्थाने अप्रतिवेष्टितं यथाभूतम् ऋज्वेव जिह्वाग्रं करणत्वेन उपयोक्तव्यम् ॥

❋ ॥ वकारस्य त्वधरोष्ठः ॥ ५६ ॥ ❋

'तवर्गवलसानाम् उत्तरदन्ताः' इति ४८ सूत्रे उक्तत्वात् पूर्वेण सूत्रेण उत्तरदन्तस्थानाया वकारश्रुतेरपि जिह्वाग्रमेव करणतया प्राप्तम् । तत् 'तु'शब्देन व्यावर्त्यते । वकारस्य 'तु' श्रुतेः अधरोष्ठ एव करणम् ॥

❋ ॥ ओष्ठयोरोष्ठावेव ॥ ५७ ॥ ❋

ओष्ठौ यासां श्रुतीनां स्थानं, तासां तावेव करणं च । यद्यपि अन्यासु श्रुतिषु स्थानं करणं च अन्यदन्यद् भवति तथापि ३४-सूत्रोक्ते स्थानकरणलक्षणे उभे अपि उभयोः ओष्ठयोः स्तः । तथा हि [प् फ् ब् भ् म् ५] इत्यासु श्रुतिषु उभाभ्यामपि ओष्ठाभ्याम् अन्योन्यस्मिन् संसर्गः क्रियते । ततो यस्मिन् येन संसर्गः इत्युभयम् ओष्ठयोः सङ्गतम् इति तावेव उभौ स्थानं करणं च ।

अत्र केचिद् उपध्मानीयश्रुतौ कार्यायां अधरोष्ठम् उत्तरदन्तेषु स्पर्शयन्तः [f] इत्येतां भाषान्तरीयां श्रुतिं कुर्वन्ति । तत्तु न साधु । उपध्मानीयश्रुतिः केवलाभ्याम् ओष्ठाभ्यामेव कार्या ॥


॥ [ळ् ळ्ह्] इत्यनयोः श्रुत्योः व्याख्यानम् ॥

यद्यपि अनयोः वर्णयोः पाणिनिना भाषायाम् अनुपदेशात् न एतद्ग्रन्थविषयता, तथापि जिज्ञासुतृप्तये उच्यते । [ळ् ळ्ह्] इत्येते श्रुती [ड् ढ्] इत्येताभ्यां क्रमेण समानधर्माणौ सर्वत्र । संसर्गस्तु तयोः मध्यतईषत्स्पृष्टः । ळ्ह् इति चिह्नेन च एको वर्णः सूच्यते, न ळकारहकारसंयोगः ॥

एतावता व्यञ्जनश्रुतीनां सर्वे धर्माः साधारणविशेषा व्याख्याताः। तेनैव यद्यपि तेषां यथा उच्चारणं कार्यम् इत्येतत् ज्ञायते, तथापि स्पष्टतरप्रतिपत्तये चित्राणि लिख्यन्ते। तत्र अन्तस्स्थानां रेफस्य च श्रुतेः चित्राणि लिखितान्येव संसर्गनिरूपणे। अधुना स्पर्शानाम् ऊष्मणां च लिख्यन्ते।


इमानि च चित्राणि अननुनासिकानाम् अपञ्चमस्पर्शश्रुतीनाम्, अनुनासिकानां पञ्चमस्पर्शश्रुतीनाम्, ईषद्विवृतसंसर्गाणां च ऊष्मश्रुतीनां पृथक्पृथक् आनुनासिक्यं, संसर्गं, स्थानकरणे च दर्शयन्ति। तदेतत् उक्तैः धर्मैः चित्राणां संवादं परिशीलयता सुज्ञेयम्। तत्र आनुनासिक्यस्य ईषद्विवृतसंसर्गस्य च बाणचिह्नेन सूचनं कृतम्। तदपि अनुसन्धेयम्॥

पञ्चमस्पर्शानां श्रुतयः




[ङ्]

अपञ्चमस्पर्शानां श्रुतयः




[क् ख् ग् घ्]


ऊष्मणां श्रुतयः




[ऽ]












[ञ्]



[च् छ् ज् झ्]



[श्]

पञ्चमस्पर्शानां श्रुतयः	अपञ्चमस्पर्शानां श्रुतयः	ऊष्मणां श्रुतयः
		
[ण्]	[ट्ठ्ड्ढ्]	[ष्]
		
[न्]	[त्थ्द्ध्]	[स्]
		
[म्]	[प्फ्ब्भ्]	[ॼ]

इति व्यञ्जनश्रुतीनां विशेषधर्मा व्याख्याताः। अथ व्यञ्जनेतरश्रुतीनां तदेव प्रतिजानीते –

❋ ॥ अथ व्यञ्जनेतरेषां विशेषाः ॥ ५८ ॥ ❋

'श्रुतीनाम्' इत्यनुवर्तते। 'धर्माः व्याख्यायन्ते' इति शेषः। 'जिह्वाहन्वोष्ठविन्यासा इतरासाम्' इति १८ सूत्रे व्यञ्जनेतरश्रुतीनां विशेषधर्माः प्रतिज्ञाताः। तान् विवरिष्यति॥

❋ ॥ हकारस्य परस्वरश्रुतिवत् तदभावे [अ] इतिवत् ॥ ५९ ॥ ❋

हकारस्य श्रुतेः विशेषधर्माः परस्याः स्वरश्रुतेरिव भवन्ति। यथा – आह, वृत्रहा, स्तुहि, हुतम्। तदभावे इति परस्याः स्वरश्रुतेरभावे, [अ] इत्यस्याः श्रुतेरिव हकारश्रुतेः विशेषधर्मा भवन्ति। यथा – ह्रस्वः, मह्यं, जिह्वा, निर्ह्रासः।

यद्यपि लोके इमे धर्मा नैव हकारे स्पष्टं श्रूयन्ते। तथापि शास्त्रप्राप्तत्वाद् उच्यन्ते॥

अत्र प्रसङ्गादुच्यते – **हकारस्य परतः पञ्चमस्पर्शेन संयोगः** बहुत्र भवति। यथा गृह्णाति, अह्नि, ब्रह्म इत्येवं णनमैः। (ङञयोस्तु नैवास्ति।) एषु स्थलेषु एके हकारमेव पूर्वम् उच्चारयन्ति यथाप्राप्तम्। अपरे तु हकारं परं प्रयुञ्जते। अस्य च प्रयोगस्य साधुत्वे वेदसम्प्रदाय एव प्रमाणम्। एके च मह्यं जिह्वा प्रह्लादः इत्यादावपि हकारं परं प्रयुञ्जते। तत्र वेदसम्प्रदायानुग्रहः परीक्षणीयः।

अत्र उच्चारणे व्यवस्था – येषां वेदाधिकारो वर्तते शास्त्रतः, ते स्वं वेदसम्प्रदायम् अनुसरेयुः। येषां च नास्ति वेदाधिकारः, ते स्वपुरोहितकुलस्य, तदलाभे स्वश्रद्धापात्रस्य कस्यचिद् वेदविदः सम्प्रदायम् अनुसरेयुः। पदानां वर्णशो व्याख्याने तु क्रमव्यत्यासं कुर्वद्भिः अव्यत्यस्तावेव हकारपञ्चमौ व्याख्याय 'अनयोः व्युत्क्रमेण उच्चारणम्' इत्युल्लेखितव्यम्। तदैव तत्र शास्त्रशुद्धिः भवति। अन्यथा हि पदस्वरूपे वर्णानां व्युत्क्रम एव सुक्रम इति भ्रमः स्यात्॥

❋ ॥ विसर्गस्य पूर्ववत् ॥ ६० ॥ ❋

अतीतसूत्रसान्निध्यात् 'पूर्ववत्' इत्यस्मात् 'पूर्वस्वरश्रुतिवत्' इत्यर्थो लभ्यते। विसर्गस्य श्रुतेः विशेषधर्माः पूर्वस्याः स्वरश्रुतेरिव भवन्ति। इदं तु स्पष्टं श्रूयते। तथा हि 'रामः बालाः मुनिः गुरुः भवेः गोः' इत्येषु पदेषु विसर्गात् पूर्वं वर्तमानानाम् [अ आ इ उ ए ओ] इत्यासां स्वरश्रुतीनां सादृश्यमनुभूयते विसर्गस्य श्रुतौ॥

इत्येवं हकारविसर्गश्रुत्योः विशेषधर्मा अतिदेशेन बोधिताः। अत्र च कश्चिद् विशेषः ८९

सूत्रात् प्राग् वक्ष्यते अत्रैव व्याख्याने । अपि च ११ सूत्रे अनयोः यथाकथाच उच्चारणं कर्तुं शक्यते, तत्र श्रुतिपरिचयमात्रस्य इष्टत्वात् ॥

अथ इतरासां व्यञ्जनेतरश्रुतीनां धर्मान् उपदेशेन बोधयति –

॥ [अ आ] इत्यनयोरनुस्वारस्य च जिह्वा प्रण्यस्ता ॥ ६१ ॥

१५ सूत्रात् पूर्वसूत्रपर्यन्तं षष्ठ्यन्ततया अनुवृत्तं 'श्रुतीनाम्' इति पदम् इत आरभ्य सप्तम्यन्ततया परिणम्य अनुवर्तते । [अ आ] इत्यनयोः श्रुत्योः अनुस्वारस्य च श्रुतौ जिह्वा प्रण्यस्ता निर्व्यापारतया प्रसारिता ॥

॥ [उ ओ] इत्यनयोर्जिह्वामूलं कोमलतालुसमीपे तिष्ठति ॥ ६२ ॥

'तिष्ठति' इति पदं प्रण्यस्तपदानुवृत्तिबाधाय । [उ ओ] इत्यनयोः श्रुत्योः जिह्वामूलं कोमलतालुनः समीपे व्यापारपूर्वकं गत्वा तत्र तिष्ठति । अयं जिह्वाविन्यासः **अभिमूलम्** इत्युच्यते ॥

किं च प्रयोजनं नामकरणस्य ? निरुक्तिसौकर्यम् इति ब्रूमः । उत्तरत्र (५२ पुटे) सर्वेषां वर्णानां स्वरूपनिरुक्तिवाक्यानि रचयिष्यामः । तत्रास्याः जिह्वास्थितेः अभिमूलपदेन परामर्शः करिष्यते । एवमग्रे अभिमध्यम् अभ्यग्रम् इत्यनयोरपि ॥

॥ [इ ए] इत्यनयोर्जिह्वामध्यं तालुसमीपे ॥ ६३ ॥

[इ ए] इत्यनयोः श्रुत्योः जिह्वामध्यं तालुनः समीपे तिष्ठति । इदम् **अभिमध्यम्** ॥

॥ ['*'] इत्यस्यां जिह्वाग्रं बर्स्वसमीपे ॥ ६४ ॥


['*'] इत्यस्याम् अज्भक्तिश्रुतौ जिह्वाग्रं बर्स्वानां समीपे तिष्ठति । इदम् **अभ्यग्रम्** ॥

एवं जिह्वाविन्यासा उक्ताः । अथ हनुविन्यासानाह –

॥ अनुस्वारस्याधरा हनुरुत्तरां स्पृशति ॥ ६५ ॥

अनुस्वारस्य श्रुतौ अधरा हनुः उत्तरां हनुं स्पृशति । अत्र हन्वोः साक्षात् स्पर्शनस्य कर्तुम् अशक्यत्वात् फलिततया दन्तपङ्क्त्योः स्पर्शनं कर्तव्यमिति सिध्यति । तथा उत्तरत्र चित्रे दर्शितम् । हनुविन्यासेषु इदं **स्पृष्टम्** ॥

अत्र केचिद् अनुस्वारश्रुतौ कार्यायां केवलौ ओष्ठौ परस्परस्मिन् स्पर्शयन्तः [म्] इति



मकारश्रुतिं कुर्वन्ति । तत्तु न साधु । मकारानुस्वारयोः अभेदो हि स्यात्, यदि श्रुतिभेदो न स्यात् ।

अनुस्वारश्रुतौ हन्वोः परस्परस्पर्श एव प्रधानः । तत्र आनुषङ्गिकः ओष्ठस्पर्शः स्यात् न वा । मकारश्रुतौ हनुस्पर्शो न भवति । तत्र ओष्ठस्पर्श एव प्रधानः । अयमेव भेदो मकारानुस्वारयोः । अत्र दत्ते अनुस्वारश्रुतिचित्रे पूर्वत्र दत्ते मकारश्रुतिचित्रे चायं भेदः स्पष्टं लक्षयितुं शक्यते ॥

❋ ॥ [अ इ उ '*'] इत्यासु तस्याः समीपे तिष्ठति ॥ ६६ ॥ ❋

आसु श्रुतिषु अधरा हनुः उत्तरस्याः हन्वाः समीपे तिष्ठति । हनुविन्यासेषु इदं **संवृतम्** ॥

❋ ॥ [आ ए ओ] इत्यासु ततो दूरे ॥ ६७ ॥ ❋

आसु तु श्रुतिषु अधरा हनुः उत्तरस्याः दूरे तिष्ठति । हनुविन्यासेषु इदं **विवृतम्** । अत्रैव च भेदः [अ आ] इत्यनयोः श्रुत्योः मिथः, तथा [इ ए] इत्यनयोः [उ ओ] इत्यनयोश्च ॥

एवं हनुविन्यासा व्याख्याताः । अथोष्ठविन्यास उच्यते –

❋ ॥ [उ ओ] इत्यनयोरोष्ठौ संवृतौ दीर्घौ च ॥ ६८ ॥ ❋

अनयोः श्रुत्योः ओष्ठौ संवृतौ अन्योन्यसमीपवर्तिनौ, पुरस्ताद्गमनेन दीर्घौ च स्याताम् । अयम् ओष्ठविन्यास **उपसंहारः** उच्यते । एवंरूपौ चोष्ठौ उपसंहृतौ उच्येते ॥


❋ ॥ इतरास्वक्रियौ ॥ ६९ ॥ ❋

इतरासु व्यञ्जनेतरश्रुतिषु [अ आ इ '*' ए ''] इत्यासु ओष्ठौ अक्रियौ एव स्याताम् । अत्र च इतरशब्देन केवलकण्ठ्यश्रुत्योः ग्रहणं न । अतिदेशेन हि ते पूर्वमेव अनुगृहीते । तत्र यथातिदेशं धर्मा भवन्त्येव ॥


एतावता व्यञ्जनेतरश्रुतीनां सर्वे धर्माः साधारणविशेषा व्याख्याताः । ततश्च पूर्ववत् उच्चारणरीतिप्रदर्शकानि चित्राणि लेखनीयानि । तत्र अनुस्वारश्रुतेः चित्रं लिखितमेव । स्वराणां च यदि क्रियते ततः केवलकण्ठ्ययोरपि अतिदेशात् सिद्धम् । ततः स्वरश्रुतीरेव चित्रयामः ।

अत्र जिह्वाविन्यासाः स्पष्टं दृश्यन्ते । संवृतविवृतयोः हनुविन्यासयोः प्रदर्शनं बाणचिह्नैः


कृतम्। [उ ओ] इत्यनयोश्च श्रुत्योः ओष्ठोपसंहारः (अन्योन्यसामीप्यं दीर्घता च) द्रष्टव्यः।




[अ]




[इ]




[उ]




[आ]



[ए]



[ओ]



['*']

* * *

ॐ

।। चतुर्थं प्रकरणम् – कालस्य व्याख्यानम् ।।

*

इत्थम् आदौ सर्वश्रुतिसाधारणधर्माणां, ततो व्यञ्जनश्रुतिविशेषधर्मयोः, इतः अनन्तरपूर्वं च व्यञ्जनेतरश्रुतिविशेषधर्माणां निरूपणेन सर्वासां श्रुतीनां सर्वे धर्मा उक्ताः । एतैश्चैव धर्मैः श्रुतयो निरूप्यन्ते । तेन तैः निरुक्तैः श्रुतयो निरुक्ता भवन्ति इति १५ सूत्रे प्रतिज्ञाता श्रुतीनां धर्मतो निरुक्तिः कृता । ४ सूत्रे च वर्णश्रुतेः कालयोगेन वर्णो भवतीत्युक्तम् । ततः श्रुतेः निरूपणे अवसिते कालं निरूपयितुम् उपक्रमते –

❋ ।। अथ कालः ।। ७० ।। ❋

कालधर्मस्य सर्वत्र मात्रामानेन वक्ष्यमाणत्वात् आदौ मात्रां निर्वक्ति –

❋ ।। होराया अष्टादशाहतसहस्रतमो भागो मात्रा ।। ७१ ।। ❋

अहोरात्रस्य चतुर्विंशतिः होराः इति प्रसिद्धम् । तस्य होराकालस्य १८,००० भागा यदि कल्प्यन्ते तत्र एको भागः मात्रा । गणनेन इदं सुज्ञेयं यद् अयम् आधुनिकपरिभाषायाम् ०.२-सेकण्ड्-आत्मकः कालः ।।

अथ काश्चित् सौकर्यार्थाः संज्ञा आह –

❋ ।। एका द्वे तिस्रो मात्रा ह्रस्वो दीर्घः प्लुतः ।। ७२ ।। ❋

एका मात्रा ह्रस्वः कालः । द्वे दीर्घः । तिस्रः प्लुतः ।।

* * *

ॐ

।। पञ्चमं प्रकरणम् – श्रुतिकालयोगेन वर्णनिरुक्तिः ।।

*

अथ कालस्वरूपे संक्षेपतो निरूपिते श्रुतिषु कालयोगेन वर्णान् निर्वक्ष्यति । तत्राह –

❋ ।। अथैकश्रुतयो वर्णाः ।। ७३ ।। ❋

येषां वर्णानां यावन्तं कालम् एका एव श्रुतिः श्रूयते ते एकश्रुतयो वर्णाः ।।

❋ ।। [अ] इत्यस्या ह्रस्वेन ।। ७४ ।। ❋

अस्याः श्रुतेः ह्रस्वेन कालेन **एकः** एकश्रुतिर्वर्णो भवति – अ इति ।।

❋ ।। [आ ए ओ] इत्यासां दीर्घप्लुताभ्याम् ।। ७५ ।। ❋

आसां श्रुतीनां प्रत्येकं दीर्घप्लुताभ्यां कालाभ्यां **षड्** एकश्रुतयो वर्णा भवन्ति –
आ आ(३), ए ए(३), ओ ओ(३) इति ।।

❋ ।। [इ उ] इत्यनयोस्त्रिभिरपि ।। ७६ ।। ❋

अनयोः श्रुत्योः प्रत्येकं त्रिभिरपि ह्रस्वदीर्घप्लुतैः कालैः **षड्** एकश्रुतयो वर्णाः भवन्ति –
इ ई ई(३), उ ऊ ऊ(३) इति ।।

❋ ।। स्वरेतरेषाम् अर्धमात्रया ।। ७७ ।। ❋

अत्र मण्डूकप्लुत्या १५ सूत्रात् ६० सूत्रान्तम् अनुवृत्तं 'श्रुतीनाम्' इत्येतत् अत्रापि सम्बध्यते, योग्यत्वात् । श्रुतीनां हि कालयोगेन वर्णा अत्र उच्यन्ते । स्वरेतरेषां – व्यञ्जनानाम् उपस्वराणां च – याः सप्तत्रिंशत् श्रुतयः तासाम् अर्धमात्रया कालेन **सप्तत्रिंशद्** एकश्रुतयो वर्णा भवन्ति – क् ख् ग् इत्यादयः ।।

❋ ॥ अथानेकश्रुतयो वर्णाः ॥ ७८ ॥ ❋

येषां वर्णानां यावन्तं कालम् अनेका श्रुतिः श्रूयते ते अनेकश्रुतयो वर्णाः । एषां वर्णानाम् अनेकश्रुतिकत्वादेव स्वरूपबोधे क्लेशं सम्भावयन् प्रथमं लक्ष्यमेव दर्शयति, लक्ष्ये प्रतिपन्ने लक्षणं सुगमं स्यादिति । तत्र तावत् –

❋ ॥ ऋ ॠ ऋ॒(३) इति त्रिकालाः स्वराः ॥ ७९ ॥ ❋

ह्रस्वदीर्घप्लुताः त्रयः काला येषां ते त्रिकालाः । ते च स्वरा इति ज्ञेयम् । किमर्थमिदम् उच्यते ? श्रूयताम् । एते हि स्वरव्यञ्जनश्रुत्योः सम्मिश्रणाद् जायन्ते इत्यनुपदमेव वक्ष्यते । तत्र किमेते स्वरा इति मन्तव्या उत व्यञ्जनानि इति सन्देहे स्वरा इत्याह । प्रयोजनं शास्त्रान्तरे ॥

❋ ॥ ऌ ॡ ऌ॒(३) इति ह्रस्वप्लुतकालौ ॥ ८० ॥ ❋

स्वरौ इत्येव । स्पष्टमन्यत् । एते **पञ्च** वर्णा अधुना व्याक्रियन्ते श्रुतिकालयोः प्रदर्शनेन –

❋ ॥ एष्वादौ मात्रापादम् ['*'] इत्येषा ॥ ८१ ॥ ❋

एषु वर्णेषु आदौ मात्रापादं यावत् ['*'] इत्येषा अञ्भक्तिश्रुतिः श्रूयते ॥

❋ ॥ ततो मात्रार्धं त्रिषु रेफस्य द्वयोर्लकारस्य ॥ ८२ ॥ ❋

मात्रापादात् परं त्रिषु आद्येषु वर्णेषु रेफस्य श्रुतिः मात्रार्धं श्रूयते । द्वयोः उत्तरयोः लकारस्य श्रुतिः ॥

❋ ॥ ततः शेषम् आदाविव ॥ ८३ ॥ ❋

प्रथमेन अञ्भक्तिश्रुतिभागेन द्वितीयेन रेफलकारश्रुतिभागेन च गतेन यावान् काल एषु वर्णेषु शिष्यते तावन्तं कालम् आदाविव ['*'] इत्येषा अञ्भक्तिश्रुतिरेव भवति । ह्रस्वे तावत् मात्रापादः शिष्यते । दीर्घे मात्रापादाधिका एका मात्रा । प्लुते मात्रापादाधिके द्वे मात्रे । तावन्तं कालम् अञ्भक्तिश्रुतिः पुनः भवति । सूत्रे श्रुतिमेव उच्चारयितुं शक्तोऽपि यद् 'आदाविव' इत्याह तद् द्रढयति आद्ये अन्त्ये च भागे समानायाः श्रुतेः सत्ताम् ।

अत्र '.' इति मात्रापादकाला अञ्भक्तिश्रुतिः, र् ल् इति च क्रमेण अर्धमात्राकाले रेफलकारश्रुती इति गृहीत्वा एषां वर्णानां स्वरूपं सूच्यते –

ऋ = .र्. ॠ = .र्. .... ॠ(३) = .र्. ....

ऌ = .ल्. ऌ(३) = .ल्. ....

एवम् एषु वर्णेषु स्वरतया लोके प्रसिद्धेष्वपि आद्ये अन्त्ये चैव भागे स्वरश्रुतिः वर्तते। मध्ये तु व्यञ्जनश्रुतिः। इत्थं स्वरव्यञ्जनश्रुत्योः सम्पृक्ततया एषां वर्णानां **पृक्तस्वराः** इति नाम॥

॥ प्रासङ्गिकम् ऌकारविषयं लेखनजभ्रमनिवर्तनम्॥

अत्र इदं विवक्षामः। ऌ इत्यस्य वर्णस्य उच्चारणे केचित् लिप्या भ्रामिताः रेफश्रुतिमपि योजयन्ति। तन्नाम यथा 'ऌट्' 'ऌङ्' इत्यत्र ल्+ऋ इति लकारव्यञ्जनात् परं रेफश्रुतिमतः पृक्तस्वरस्य सत्त्वे उभयोः [ल् र्] इत्यनयोः श्रुत्योः न्याय्यं श्रवणं भवति, तथा 'ऋलृक्' 'गमॢ' इत्यादावपि कुर्वन्ति। तत्तु न साधु। [ल्] इत्येषा एकैव हि व्यञ्जनश्रुतिः ऌकारे शास्त्रतः प्राप्ता। न तु [र्] इत्येषापि।

ॡ ऌ इत्यनयोः चिह्नयोः देवनागरीलिप्यां सादृश्यमस्ति इति कारणेनैव प्रायो लोको भ्राम्यति, 'ऋलृक्' 'गमॢ' 'क्लृप्तम्' इत्यादौ ऌ इत्यनेन ल्+ऋ इत्ययं व्यञ्जनस्वरयोः समुदायो विवक्षित इति। क्वचित् पुनः ऌ इत्यस्य स्थाने प्रमादात् ॡ इत्येव मुद्रणं कुर्वन्ति। विपरीतं वा ॡ इत्यस्य स्थाने ऌ इति। नमो लिपिभ्रमेभ्यः ! सर्वथा शिक्षावित् ऌ इत्यस्य वर्णस्य (तत्प्लुतस्य च) विषये चिह्नजन्यान् भ्रमान् व्युदस्य शुद्धोच्चारणपरो भवेत्॥

अथ अन्येऽपि अनेकश्रुतयो वर्णा उच्यन्ते। तत्र पूर्ववत् लक्ष्यस्य प्रदर्शनं प्रथमं क्रियते, ततो लक्षणमुच्यते –

❋ ॥ ऐ औ इति दीर्घकालौ ॥ ८४ ॥ ❋

❋ ॥ ऐ(४) औ(४) इति चतुर्मात्रौ प्लुताख्यौ ॥ ८५ ॥ ❋

पूर्वौ द्विमात्रौ, दीर्घकालौ इत्युक्तत्वात्। उत्तरौ तु चतुर्मात्रौ इति कण्ठत उच्यते। तत्र च विशेषः – अनयोः चतुर्मात्रयोः सतोरपि प्लुत इत्याख्या व्यपदेशो लोके भवति। तन्नाम पूर्वयोः दीर्घकालयोः स्थाने यत्र लोके प्लुतः कर्तव्यः तत्र उत्तरौ प्रयुज्येते॥

एते **चत्वारः** वर्णाः अधुना व्याक्रियन्ते श्रुतिप्रदर्शनेन –

❋ ॥ एष्वादौ मात्राम् [आ] इत्येषा ॥ ८६ ॥ ❋

एषु वर्णेषु चतुर्षु अपि आदौ मात्रां यावत् [आ] इत्येषा श्रुतिः श्रूयते ॥

❋ ॥ ततो दीर्घ एकां मात्राम् [इ उ] इत्येते ॥ ८७ ॥ ❋

तस्या मात्रायाः परं दीर्घे काले पूरणीये अवशिष्टाम् एकां मात्राम् [इ उ] इत्येते श्रुती क्रमेण भवतः ॥

❋ ॥ प्लुते तिस्रः ॥ ८८ ॥ ❋

प्लुते चतुर्मात्रे पूरणीये अवशिष्टाः तिस्रो मात्राः [इ उ] इत्येते एव श्रुती क्रमेण भवतः ।

अत्र पृक्तस्वरेष्विव मात्राकालिकम् आदिमं भागम् उक्त्वा 'शेषम् [इ उ] इत्येते' इत्येवमेव लघुतया एकयत्नेन सूत्रयितुं शक्ये सति सूत्रद्वयकरणम् अप्रसिद्धस्य चतुर्मात्रप्लुतस्वरूपस्य प्रत्येककथनेन दृढतरं बोधनाय ॥

एषां चतुर्णां स्वरूपम् [आ१इ१] [आ१उ१] [आ१इ३] [आ१उ३] इति प्रदर्शयितुं शक्यम् । अत्र वर्णचिह्नानि [ ] चिह्नान्तर्गतत्वात् श्रुतिमात्रपराणि । मध्ये दत्ताश्च अङ्काः मात्रामानेन कालपरिमाणं वदन्ति । एवं सर्वत्र **लघुना उपायेन वर्णानां श्रुतिकालनिर्देशः** कर्तुं शक्यते । तत्र च कालविषये मात्रापादस्य व इति, अर्धमात्रायाश्च अ इति चिह्नेन सूचनं क्वचिद् वर्तते । तस्मात् तदेव यत्रापेक्षितम् उपयुज्यते ॥

॥ अनेकश्रुतिवर्णेन अनन्तरस्य केवलकण्ठ्यवर्णस्य विशेषधर्माः ॥

अयं विषयः पूर्वमेव सिद्धोऽपि अत्र अनेकश्रुतिकेषु वर्णेषु निरूपितेषु स्पष्टीक्रियते – यत्र अनेकश्रुतेः स्वरवर्णात् पूर्वं हकारः परं वा विसर्गः तिष्ठति पदे, तत्र या हकारविसर्गयोः अनन्तरा स्वरश्रुतिः तस्या एव विशेषधर्माः हकारविसर्गयोः श्रुतौ भवन्ति । एतदेव स्पष्टतरं गमयितुं 'परस्वरवत्' इति लाघवेन अनुक्त्वा 'परस्वरश्रुतिवत्' इत्युक्तं ५९ सूत्रे ।

एतेन च हृदयं मातृः इत्यत्र हकारात् परस्य ऋकारस्य आदौ, विसर्गात् पूर्वस्य ॠकारस्य चान्ते अज्भक्तिरस्तीति तच्छ्रुतेरेव अनन्तरत्वात् तत्सादृश्यमेव हकारविसर्गश्रुत्योः । एधामहै अनड्वाहौ तैः गौः इत्यत्र च क्रमेण [ह्अइ] [ह्आउ] [आइ':'] [आउ':'] इति श्रुत्यानुपूर्वी वर्तते । तत्र हकारश्रुतौ अनन्तराया आकारश्रुतेरेव सादृश्यं, न तु अन्तरितयोः

इवर्णोवर्णश्रुत्योः । विसर्गश्रुतौ तु अनन्तरयोः इवर्णोवर्णश्रुत्योरेव सादृश्यं, न तु अन्तरितायाः आकारश्रुतेः । तस्मात् अनन्तरां स्वरश्रुतिं निश्चित्य हकारविसर्गश्रुती निर्वक्तव्ये ॥

❋ ॥ इति नवपञ्चाशद् वर्णाः संस्कृताः ॥ ८९ ॥ ❋

एकश्रुतयो वर्णाः पञ्चाशत्, अनेकश्रुतयश्च नव इति नवपञ्चाशद् वर्णाः समन्ततो भवन्ति । ते चैते नवपञ्चाशद् वर्णाः उक्तलक्षणानां श्रुतीनाम् उक्तलक्षणैः कालैः योगे सञ्जायमानाः संस्कृताः शास्त्रतः शुद्धा ज्ञेयाः ॥

एवं शिक्षया संस्कृतानां वर्णानां व्याकरणसंस्कृतेन क्रमेण पदात्मकतया उच्चारणे क्रियमाणे, अर्थे च भगवद्गीताद्युक्तेन सत्यप्रियहितादिना गुणेन संस्कृते, वाङ्मयं तप एव आचरितं भवति भाषाप्रयोगेण, न लोकयात्रानिर्वाहमात्रम् । तस्मात् श्रेय इच्छता मनुजेन संस्कृता वाक् प्रयोक्तुम् एष्टव्या ।

अनेन च ग्रन्थेन अधीतेन बुद्धेन शिक्षायां प्रथमा काचित् क्लृप्तिः सामर्थ्यरूपा साधिता भवति । तया च क्लृप्त्या ग्रन्थोक्तैः विषयैः शुद्धवर्णोच्चारणेन आचरितैः, इतरेभ्यो बोधनेन प्रचारितैश्च भगवान् सर्वात्मकः सन्तुष्यति । तत्तोषणं हि सर्वशास्त्रफलम् ।

अयं च ग्रन्थः एतावता सम्पूर्तिं प्रापत् इत्यतः प्रथमे ग्रन्थारम्भसूत्रे प्रतिज्ञातस्यैव विषयस्य पुनः मङ्गलार्थं ग्रन्थसमाप्तिद्योतनार्थं च द्विवारं कथनेन उपसंहारो विधीयते –

❋ ॥ इति शिक्षायां प्रथमा क्लृप्तिः प्रथमा क्लृप्तिः ॥ ९० ॥ ❋

*

॥ इत्यर्थप्रकाशाख्यव्याख्यासंवलिता शिक्षाप्रथमक्लृप्तिः सम्पूर्णा ॥

* * *

ॐ

॥ ग्रन्थसारसङ्ग्रहः - १ ॥

॥ विषयसङ्ग्राहकाणि कोष्ठकानि ॥

वर्णाः		
स्वराः		अ आ आ(३) इ ई ई(३) उ ऊ ऊ(३) ऋ ॠ ॠ(३) ऌ ॡ ॡ(३) ए ए(३) ओ ओ(३) ऐ ऐ(४) औ औ(४), एषामेव अनुनासिकानि रूपाणि च
व्यञ्जनानि	स्पर्शाः	क् ख् ग् घ् ङ् च् छ् ज् झ् ञ् ट् ठ् ड् ढ् ण् त् थ् द् ध् न् प् फ् ब् भ् म्
	अन्तस्थाः	य् व् ल्, एषामेव अनुनासिकानि रूपाणि च
	रेफः	र्
	ऊष्माणः	ऽ श् ष् स् ऽ
उपस्वराः		ह् ‘:’ ‘ँ’

वर्णश्रुतयः	
स्वराणाम् स्वरेतरेषाम्	[अ आ इ उ ‘*’ ए ओ], आसामेव अनुनासिकानि रूपाणि च प्रत्येकम् एका, तत्र अन्तस्थाश्रुतीनाम् अनुनासिकानि रूपाणि च

अनुप्रदानव्यवस्था	
अनुप्रदानम्	**श्रुतयः**
श्वासः नादः	प्रथमद्वितीयस्पर्शानाम्, ऊष्मणां, विसर्गस्य च इतरेषां – स्वराणां, तृतीयचतुर्थपञ्चमस्पर्शानाम्, अन्तस्थानां, रेफस्य, हकारानुस्वारयोश्च

प्राणव्यवस्था	
प्राणः	**श्रुतयः**
महान्	द्वितीयचतुर्थस्पर्शानाम्, ऊष्मणां, केवलकण्ठ्ययोश्च
अल्पः	इतरेषां – स्वराणां, प्रथमतृतीयपञ्चमस्पर्शानाम्, अन्तस्स्थानां, रेफस्य, अनुस्वारस्य च

आनुनासिक्यव्यवस्था	
आनुनासिक्यम्	**श्रुतयः**
अस्ति	पञ्चमस्पर्शानाम्, अनुस्वारस्य च
अस्ति, नास्ति च	स्वराणाम्, अन्तस्स्थानां च
नास्ति	इतरेषाम् – प्रथमद्वितीयतृतीयचतुर्थस्पर्शानां, रेफस्य, ऊष्मणां, केवलकण्ठ्ययोश्च

संसर्गव्यवस्था		
संसर्गः	**स्वरूपम्**	**श्रुतयः**
स्पृष्टम्	करणस्य सर्वदेशेन स्थानस्पर्शः	स्पर्शानाम्
रिफितम्	करणेन स्थानस्य असकृत् आहतिः	रेफस्य
ईषद्विवृतम्	करणं स्थानात् ईषद् विवृतं तिष्ठति	ऊष्मणाम्
ईषत्स्पृष्टम्	करणस्य ईषद्देशः स्थानं स्पृशति, भूयान् देशो विवृतः	अन्तस्स्थानाम्
- अन्ततः	करणस्य अन्तभागः स्थानं स्पृशति, अन्यो देशः विवृतः	[य्] [व्]
- मध्यतः	करणस्य मध्यभागः स्थानं स्पृशति, पार्श्वौ विवृतौ	[ल्]
विवृतम्	सम्बन्धाभावः	स्वराणाम् उपस्वराणां च

स्थानकरणव्यवस्था		
स्थानम्	**करणम्**	**श्रुतयः**
कोमलतालु	जिह्वामूलम्	कवर्गस्य जिह्वामूलीयस्य च
तालु	जिह्वामध्यम्	चवर्गस्य यकारशकारयोश्च
मूर्धा	प्रतिवेष्टितं जिह्वाग्रम्	टवर्गस्य रेफषकारयोश्च
उत्तरदन्ताः	ऋजु जिह्वाग्रम्	तवर्गस्य लकारसकारयोश्च
उत्तरदन्ताः	अधरोष्ठः	वकारस्य
ओष्ठौ	ओष्ठौ	पवर्गस्य उपध्मानीयस्य च

जिह्वाहन्वोष्ठविन्यासानां व्यवस्था			
श्रुतिः	**जिह्वा**	**अधरा हनुः**	**ओष्ठौ**
[अ]	प्रण्यस्ता	संवृता	अक्रियौ
[आ]	प्रण्यस्ता	विवृता	अक्रियौ
[इ]	अभिमध्यम्	संवृता	अक्रियौ
[ए]	अभिमध्यम्	विवृता	अक्रियौ
[उ]	अभिमूलम्	संवृता	उपसंहृतौ
[ओ]	अभिमूलम्	विवृता	उपसंहृतौ
[‘*’]	अभ्यग्रम्	संवृता	अक्रियौ
[‘’]	प्रण्यस्ता	स्पृष्टा	अक्रियौ
[ह्]	परस्वरश्रुतिवत्, तदभावे [अ] इतिवत्		
[‘:’]	पूर्वस्वरश्रुतिवत्		

एकश्रुतयो वर्णाः	
श्रुतयः	**कालाः**
[अ]	ह्रस्वः
[आ ए ओ]	दीर्घप्लुतौ
[इ उ]	ह्रस्वदीर्घप्लुताः
स्वरेतरेषाम्	अर्धमात्रा

अनेकश्रुतयो वर्णाः

पृक्तस्वराः –

(अत्र व इति मात्रापादस्य, अ इति च अर्धमात्रायाः चिह्नम् इति स्मर्तव्यम्।)

रेफश्रुतिमन्तः –

ऋ [*व र्अ *व] ॠ [*व र्अ *१व] ॠ(३) [*व र्अ *२व]

लकारश्रुतिमन्तौ –

ऌ [*व ल्अ *व] ऌ(३) [*व ल्अ *२व]

इतरे –

ऐ [आ१इ१] औ [आ१उ१]

ऐ(४) [आ१इ३] औ(४) [आ१उ३]

* * *

ॐ

।। ग्रन्थसारसङ्ग्रहः - २ ।।

।। वर्णस्वरूपनिरुक्तिवाक्यानि ।।

सर्वेषां वर्णानां लघुना उपायेन स्वरूपनिरुक्तिं कर्तुं निरुक्तिवाक्यानि रच्यन्ते । 'श्रुतीः व्याख्याय तत्र कालस्य योगेन वर्णान् ब्रूयात्' इति पूर्वत्र २२ पुटे उक्त एव नियमः अत्र निरुक्तिवाक्येषु अनुसृतः । कृत्स्नां शिक्षाप्रथमकक्षुप्तिम् इमां यो बुद्धौ धारयति, स एतेभ्यो वाक्येभ्यो यथायथं सर्वेषां वर्णानां कृत्स्नस्वरूपविवरणं कर्तुमर्हति । तत्र तावद् उदाहरणतया अकारस्य स्वरूपं लक्षणवाक्योक्तैः पदैः विव्रियते ।

प्रथमम् अकारस्य श्रुतौ वर्तमानाः इमे धर्माः एभिः शब्दैः उच्यन्ते –

१) 'नादानुप्रदाना' इति कण्ठस्य संवृतत्वं, तेन घोषाख्यस्य कम्पनस्य उत्पत्तिश्च,

२) 'अल्पप्राणा' इति समीराणस्य वायोः अल्पपरिमाणत्वम्,

३) 'अननुनासिका' इति नासिकास्थानस्य निरुद्धत्वात् नासिकया वायोः असंस्कारः,

४) 'विवृतसंसर्गा' इति आस्यावयवयोः सम्बन्धस्य अभावेन मुखे वायोः अनिरुद्धता,

५) 'प्रण्यस्तजिह्वा' इति जिह्वायाः निर्व्यापारता,

६) 'संवृतहनुः' इति अधरायाः हन्वाः उत्तरासमीपे स्थितिः,

७) 'अक्रियोष्ठा' इति च ओष्ठयोः प्राकृती स्थितिः ।

एतावद्भिः धर्मैः [अ] इति श्रुतिः निरुक्ता । तत्र कालस्य योग उच्यते 'ह्रस्वकाला' इति । एवं एतत्कालपरिच्छिन्ना इयं श्रुतिरेव 'अकारः' ॥

सर्वत्र व्यञ्जनेतरश्रुतिषु अनयैव रीत्या व्याख्यानं कार्यम् । व्यञ्जनश्रुतिषु पुनः संसर्गात् परं स्थानकरणयोः उल्लेखो भवति । यथा ककारश्रुतौ 'स्पृष्टसंसर्गा' इति संसर्गम् उक्त्वा 'कोमलतालुस्थाना जिह्वामूलकरणा' इति । तत्र जिह्वामूलेन करणेन कोमलतालुनि स्थाने स्पृष्टस्य संसर्गस्य क्रियमाणत्वं व्याख्येयम् ॥

एवमेव सर्वत्र एषु निरुक्तिवाक्येषु प्रतिपदं ग्रन्थोक्ता विषयाः स्मार्यन्ते, ते सुधीभिः स्वयम् उन्नीय व्याख्येयाः ॥

॥ स्वराः ॥

सूचना – यत्रानुनासिका भवन्ति स्वराः तत्र वक्ष्यमाणेषु वाक्येषु 'अननुनासिका' इत्यस्य स्थाने 'अनुनासिका' इति प्रयोज्यम् । श्रुतयश्च अनुनासिकतयैव उच्चार्य दर्शनीयाः । पृक्तस्वरेषु च प्रथमेषु त्रिषु पूर्वोत्तरयोः अज्भक्तिश्रुत्योरेव अनुनासिकता, न तु रेफश्रुतेरपि, असम्भवात् । इतरयोः द्वयोस्तु अज्भक्तिश्रुत्योः लकारश्रुतेश्च अनुनासिकता, सम्भवात्, अनुनासिकस्य वर्णस्य सर्वो भागः अनुनासिको भवतीति औचित्याच्च ॥

१. नादानुप्रदाना अल्पप्राणा अननुनासिका विवृतसंसर्गा प्रण्यस्तजिह्वा संवृतहनुः अक्रियोष्ठा [अ] इति अकारश्रुतिः ह्रस्वकाला **अकारः** ।

२. नादानुप्रदाना अल्पप्राणा अननुनासिका विवृतसंसर्गा प्रण्यस्तजिह्वा विवृतहनुः अक्रियोष्ठा [आ] इति आकारश्रुतिः दीर्घकाला **आकारः** ।

३. (श्रुतिः इत्यन्तं समानं पूर्वेण) ... प्लुतकाला **आ(३)कारः** ।

४. नादानुप्रदाना अल्पप्राणा अननुनासिका विवृतसंसर्गा अभिमध्यजिह्वा संवृतहनुः अक्रियोष्ठा [इ] इति इवर्णश्रुतिः ह्रस्वकाला **इकारः** ।

५. (श्रुतिः इत्यन्तं समानं पूर्वेण) ... दीर्घकाला **ईकारः** ।

६. (श्रुतिः इत्यन्तं समानं पूर्वेण) ... प्लुतकाला **ई(३)कारः** ।

७. नादानुप्रदाना अल्पप्राणा अननुनासिका विवृतसंसर्गा अभिमूलजिह्वा संवृतहनुः उपसंहृतोष्ठा [उ] इति उवर्णश्रुतिः ह्रस्वकाला **उकारः** ।

८. (श्रुतिः इत्यन्तं समानं पूर्वेण) ... दीर्घकाला **ऊकारः** ।

९. (श्रुतिः इत्यन्तं समानं पूर्वेण) ... प्लुतकाला **ऊ(३)कारः** ।

१०. नादानुप्रदाना अल्पप्राणा अननुनासिका विवृतसंसर्गा अभ्यग्रजिह्वा संवृतहनुः अक्रियोष्ठा ['*'] इति अज्भक्तिश्रुतिः मात्रापादकाला, ततो नादानुप्रदाना अल्पप्राणा अननुनासिका रिफितसंसर्गा मूर्धस्थाना प्रतिवेष्टितजिह्वाग्रकरणा [र्] इति रेफश्रुतिः अर्धमात्राकाला, पुनक्तलक्षणा ['*'] इति अज्भक्तिश्रुतिः मात्रापादकाला इत्येवंरूपः ह्रस्वकालः **ऋकारः** ।

११. (रेफश्रुतिः अर्धमात्राकाला इत्यन्तं समानं पूर्वेण) ... पुनक्तलक्षणा ['*'] इति अज्भक्तिश्रुतिः सपादैकमात्राकाला इत्येवंरूपः दीर्घकालः **ॠकारः** ।

१२. (रेफश्रुतिः अर्धमात्राकाला इत्यन्तं समानं पूर्वेण) ... पुनरुक्तलक्षणा ['*'] इति अञ्जभक्तिश्रुतिः सपादद्विमात्राकाला इत्येवंरूपः प्लुतकालः **ऋ(३)कारः**।

१३. नादानुप्रदाना अल्पप्राणा अननुनासिका विवृतसंसर्गा अभ्यग्रजिह्वा संवृतहनुः अक्रियोष्ठा ['*'] इति अञ्जभक्तिश्रुतिः मात्रापादकाला, ततो नादानुप्रदाना अल्पप्राणा अननुनासिका मध्यतईषत्स्पृष्टसंसर्गा उत्तरदन्तस्थाना ऋजुजिह्वाग्रकरणा [ऌ] इति लकारश्रुतिः अर्धमात्राकाला, पुनरुक्तलक्षणा ['*'] इति अञ्जभक्तिश्रुतिः मात्रापादकाला इत्येवंरूपः ह्रस्वकालः **ऌकारः**।

१४. (लकारश्रुतिः अर्धमात्राकाला इत्यन्तं समानं पूर्वेण) ... पुनरुक्तलक्षणा ['*'] इति अञ्जभक्तिश्रुतिः सपादद्विमात्राकाला इत्येवंरूपः प्लुतकालः **ऌ(३)कारः**।

१५. नादानुप्रदाना अल्पप्राणा अननुनासिका विवृतसंसर्गा अभिमध्यजिह्वा विवृतहनुः अक्रियोष्ठा [ए] इति एकारश्रुतिः दीर्घकाला **एकारः**।

१६. (श्रुतिः इत्यन्तं समानं पूर्वेण) ... प्लुतकाला **ए(३)कारः**।

१७. नादानुप्रदाना अल्पप्राणा अननुनासिका विवृतसंसर्गा अभिमूलजिह्वा विवृतहनुः उपसंहृतोष्ठा [ओ] इति ओकारश्रुतिः दीर्घकाला **ओकारः**।

१८. (श्रुतिः इत्यन्तं समानं पूर्वेण) ... प्लुतकाला **ओ(३)कारः**।

१९. नादानुप्रदाना अल्पप्राणा अननुनासिका विवृतसंसर्गा प्रण्यस्तजिह्वा विवृतहनुः अक्रियोष्ठा [आ] इति आकारश्रुतिः एकमात्राकाला, ततस्तथाभूता अभिमध्यजिह्वा संवृतहनुः अक्रियोष्ठा [इ] इति इवर्णश्रुतिः एकमात्राकाला इत्येवंरूपः दीर्घकालः **ऐकारः**।

२०. (इवर्णश्रुतिः इत्यन्तं समानं पूर्वेण) ... त्रिमात्राकाला इत्येवंरूपः चतुर्मात्रप्लुतः **ऐ(४)कारः**।

२१. नादानुप्रदाना अल्पप्राणा अननुनासिका विवृतसंसर्गा प्रण्यस्तजिह्वा विवृतहनुः अक्रियोष्ठा [आ] इति आकारश्रुतिः एकमात्राकाला, ततस्तथाभूता अभिमूलजिह्वा संवृतहनुः उपसंहृतोष्ठा [उ] इति उवर्णश्रुतिः एकमात्राकाला इत्येवंरूपः दीर्घकालः **औकारः**।

२२. (उवर्णश्रुतिः इत्यन्तं समानं पूर्वेण) ... त्रिमात्राकाला इत्येवंरूपः चतुर्मात्रप्लुतः **औ(४)कारः**।

॥ स्पर्शाः ॥

॥ कवर्गः ॥

२३. श्वासानुप्रदाना अल्पप्राणा अननुनासिका स्पृष्टसंसर्गा कोमलतालुस्थाना जिह्वामूलकरणा [क्] इति श्रुतिः अर्धमात्राकाला **ककारः**।

२४. श्वासानुप्रदाना महाप्राणा अननुनासिका स्पृष्टसंसर्गा कोमलतालुस्थाना जिह्वामूलकरणा [ख्] इति श्रुतिः अर्धमात्राकाला **खकारः**।

२५. नादानुप्रदाना अल्पप्राणा अननुनासिका स्पृष्टसंसर्गा कोमलतालुस्थाना जिह्वामूलकरणा [ग्] इति श्रुतिः अर्धमात्राकाला **गकारः**।

२६. नादानुप्रदाना महाप्राणा अननुनासिका स्पृष्टसंसर्गा कोमलतालुस्थाना जिह्वामूलकरणा [घ्] इति श्रुतिः अर्धमात्राकाला **घकारः**।

२७. नादानुप्रदाना अल्पप्राणा अनुनासिका स्पृष्टसंसर्गा कोमलतालुस्थाना जिह्वामूलकरणा [ङ्] इति श्रुतिः अर्धमात्राकाला **ङकारः**।

॥ चवर्गः ॥

२८. श्वासानुप्रदाना अल्पप्राणा अननुनासिका स्पृष्टसंसर्गा तालुस्थाना जिह्वामध्यकरणा [च्] इति श्रुतिः अर्धमात्राकाला **चकारः**।

२९. श्वासानुप्रदाना महाप्राणा अननुनासिका स्पृष्टसंसर्गा तालुस्थाना जिह्वामध्यकरणा [छ्] इति श्रुतिः अर्धमात्राकाला **छकारः**।

३०. नादानुप्रदाना अल्पप्राणा अननुनासिका स्पृष्टसंसर्गा तालुस्थाना जिह्वामध्यकरणा [ज्] इति श्रुतिः अर्धमात्राकाला **जकारः**।

३१. नादानुप्रदाना महाप्राणा अननुनासिका स्पृष्टसंसर्गा तालुस्थाना जिह्वामध्यकरणा [झ्] इति श्रुतिः अर्धमात्राकाला **झकारः**।

३२. नादानुप्रदाना अल्पप्राणा अनुनासिका स्पृष्टसंसर्गा तालुस्थाना जिह्वामध्यकरणा [ञ्] इति श्रुतिः अर्धमात्राकाला **ञकारः**।

॥ टवर्गः ॥

३३. श्वासानुप्रदाना अल्पप्राणा अननुनासिका स्पृष्टसंसर्गा मूर्धस्थाना प्रतिवेष्टितजिह्वाग्रकरणा [ट्] इति श्रुतिः अर्धमात्राकाला **टकारः**।

३४. श्वासानुप्रदाना महाप्राणा अननुनासिका स्पृष्टसंसर्गा मूर्धस्थाना प्रतिवेष्टितजिह्वाग्रकरणा [ठ्] इति श्रुतिः अर्धमात्राकाला **ठकारः**।

३५. नादानुप्रदाना अल्पप्राणा अननुनासिका स्पृष्टसंसर्गा मूर्धस्थाना प्रतिवेष्टितजिह्वाग्रकरणा [ड्] इति श्रुतिः अर्धमात्राकाला **डकारः**।

३६. नादानुप्रदाना महाप्राणा अननुनासिका स्पृष्टसंसर्गा मूर्धस्थाना प्रतिवेष्टितजिह्वाग्रकरणा [ढ्] इति श्रुतिः अर्धमात्राकाला **ढकारः**।

३७. नादानुप्रदाना अल्पप्राणा अनुनासिका स्पृष्टसंसर्गा मूर्धस्थाना प्रतिवेष्टितजिह्वाग्रकरणा [ण्] इति श्रुतिः अर्धमात्राकाला **णकारः**।

॥ तवर्गः ॥

३८. श्वासानुप्रदाना अल्पप्राणा अननुनासिका स्पृष्टसंसर्गा उत्तरदन्तस्थाना ऋजुजिह्वाग्रकरणा [त्] इति श्रुतिः अर्धमात्राकाला **तकारः**।

३९. श्वासानुप्रदाना महाप्राणा अननुनासिका स्पृष्टसंसर्गा उत्तरदन्तस्थाना ऋजुजिह्वाग्रकरणा [थ्] इति श्रुतिः अर्धमात्राकाला **थकारः**।

४०. नादानुप्रदाना अल्पप्राणा अननुनासिका स्पृष्टसंसर्गा उत्तरदन्तस्थाना ऋजुजिह्वाग्रकरणा [द्] इति श्रुतिः अर्धमात्राकाला **दकारः**।

४१. नादानुप्रदाना महाप्राणा अननुनासिका स्पृष्टसंसर्गा उत्तरदन्तस्थाना ऋजुजिह्वाग्रकरणा [ध्] इति श्रुतिः अर्धमात्राकाला **धकारः**।

४२. नादानुप्रदाना अल्पप्राणा अनुनासिका स्पृष्टसंसर्गा उत्तरदन्तस्थाना ऋजुजिह्वाग्रकरणा [न्] इति श्रुतिः अर्धमात्राकाला **नकारः**।

॥ पवर्गः ॥

४३. श्वासानुप्रदाना अल्पप्राणा अननुनासिका स्पृष्टसंसर्गा उभयोष्ठस्थानकरणा [प्] इति श्रुतिः अर्धमात्राकाला **पकारः**।

४४. श्वासानुप्रदाना महाप्राणा अननुनासिका स्पृष्टसंसर्गा उभयोष्ठस्थानकरणा [फ्] इति श्रुतिः अर्धमात्राकाला **फकारः**।

४५. नादानुप्रदाना अल्पप्राणा अननुनासिका स्पृष्टसंसर्गा उभयोष्ठस्थानकरणा [ब्] इति श्रुतिः अर्धमात्राकाला **बकारः**।

४६. नादानुप्रदाना महाप्राणा अननुनासिका स्पृष्टसंसर्गा उभयोष्ठस्थानकरणा [भ्] इति श्रुतिः अर्धमात्राकाला **भकारः**।

४७. नादानुप्रदाना अल्पप्राणा अनुनासिका स्पृष्टसंसर्गा उभयोष्ठस्थानकरणा [म्] इति श्रुतिः अर्धमात्राकाला **मकारः**।

॥ अन्तस्स्थाः ॥

सूचना – यत्रानुनासिका भवन्ति अन्तस्स्थाः तत्र वक्ष्यमाणेषु वाक्येषु 'अननुनासिका' इत्यस्य स्थाने 'अनुनासिका' इति प्रयोज्यम्। श्रुतयश्च अनुनासिकतयैव उच्चार्य दर्शनीयाः।

४८. नादानुप्रदाना अल्पप्राणा अननुनासिका अन्ततईषत्स्पृष्टसंसर्गा तालुस्थाना जिह्वामध्यकरणा [य्] इति श्रुतिः अर्धमात्राकाला **यकारः**।

४९. नादानुप्रदाना अल्पप्राणा अननुनासिका अन्ततईषत्स्पृष्टसंसर्गा उत्तरदन्तस्थाना अधरोष्ठकरणा [व्] इति श्रुतिः अर्धमात्राकाला **वकारः**।

५०. नादानुप्रदाना अल्पप्राणा अननुनासिका मध्यतईषत्स्पृष्टसंसर्गा उत्तरदन्तस्थाना ऋजुजिह्वाग्रकरणा [ल्] इति श्रुतिः अर्धमात्राकाला **लकारः**।

॥ रेफः ॥

५१. नादानुप्रदाना अल्पप्राणा अननुनासिका रिफितसंसर्गा मूर्धस्थाना प्रतिवेष्टितजिह्वाग्रकरणा [र्] इति श्रुतिः अर्धमात्राकाला **रेफः**।

॥ ऊष्माणः ॥

५२. श्वासानुप्रदाना महाप्राणा अननुनासिका ईषद्विवृतसंसर्गा कोमलतालुस्थाना जिह्वामूलकरणा [ऽ] इति श्रुतिः अर्धमात्राकाला **जिह्वामूलीयः**।

५३. श्वासानुप्रदाना महाप्राणा अननुनासिका ईषद्विवृतसंसर्गा तालुस्थाना जिह्वामध्यकरणा [श्] इति श्रुतिः अर्धमात्राकाला **शकारः**।

५४. श्वासानुप्रदाना महाप्राणा अननुनासिका ईषद्विवृतसंसर्गा मूर्धस्थाना प्रतिवेष्टितजिह्वाग्रकरणा [ष्] इति श्रुतिः अर्धमात्राकाला **षकारः**।

५५. श्वासानुप्रदाना महाप्राणा अननुनासिका ईषद्विवृतसंसर्गा उत्तरदन्तस्थाना ऋजुजिह्वाग्रकरणा [स्] इति श्रुतिः अर्धमात्राकाला **सकारः**।

५६. श्वासानुप्रदाना महाप्राणा अननुनासिका ईषद्विवृतसंसर्गा उभयोष्ठस्थानकरणा [⩙] इति श्रुतिः अर्धमात्राकाला **उपध्मानीयः**।

॥ केवलकण्ठ्यौ ॥

५७. नादानुप्रदाना महाप्राणा अननुनासिका विवृतसंसर्गा ...जिह्वा ...हनुः ...ओष्ठा ... इति श्रुतिः अर्धमात्राकाला **हकारः**।

५८. श्वासानुप्रदाना महाप्राणा अननुनासिका विवृतसंसर्गा ...जिह्वा ...हनुः ...ओष्ठा ... इति श्रुतिः अर्धमात्राकाला **विसर्गः**।

अत्रानयोः श्रुतौ विशेषधर्माः ५९, ६० सूत्रयोः उक्तया रीत्या उल्लेखनीयाः। तद्यथा अकारात् परस्य विसर्गस्य लक्षणं वदन् – 'श्वासानुप्रदाना महाप्राणा अननुनासिका विवृतसंसर्गा प्रण्यस्तजिह्वा संवृतहनुः अक्रियोष्ठा' इत्युक्त्वा रामः इत्यत्र श्रूयमाणाम् [अ] इत्येतत्सदृशीं विसर्गश्रुतिम् उच्चार्य 'इति श्रुतिः अर्धमात्राकाला विसर्गः' इति ब्रूयात्। एवमन्यत्रापि ऊहनीयम्।

किञ्च ५९, ६० सूत्राभ्यां विशेषधर्माणामेव अतिदेशात् अनुनासिकायाः स्वरश्रुतेः सन्निधौ इमे श्रुती अनुनासिके भवतः इति भ्रमो न प्राप्तव्यः ॥

॥ अनुस्वारः ॥

५९. नादानुप्रदाना अल्पप्राणा अनुनासिका विवृतसंसर्गा प्रण्यस्तजिह्वा स्पृष्टहनुः अक्रियोष्ठा [◌ं] इति श्रुतिः अर्धमात्राकाला **अनुस्वारः**।

* * *

ॐ

।। अनुबन्धः - १ ।।

।। वर्णश्रुतिप्रज्ञानम् ।।

वर्णश्रुतेः स्वरूपं, तज्ज्ञानेन वर्णानां ज्ञानम् ।।

इ ई ई(३) – इमे त्रयः पृथक्पृथग् वर्णाः इति निर्विवादम् । परन्तु समानश्रवणाः एते इत्यपि प्रत्यक्षम् । तन्नाम तेषु विद्यमानं ह्रस्वत्वादिकालभेदं व्युदस्य यदि मनसा परिशीलयामः, अङ्गीकुर्मो यत् ते समानविधं श्रूयन्ते । समानं शब्दस्वरूपम् अस्ति तेषु यत् तान् भ्रातॄनिव एकच्छायान् उपप्रदर्शयति । इदं शब्दस्वरूपं तेषां वर्णानाम् श्रुतिरित्युच्यते । इ ई ई(३) इत्येषु त्रिषु वर्णेषु एकैव वर्णश्रुतिः, सा च ह्रस्वो दीर्घः प्लुत इति कालपरिमाणभेदेन नाना वर्णाः भवति ।

एतदेव पुनरुच्यते – यथा समानं व्रीहिस्वरूपं बहुधा मात्रैः (परिमाणपात्रैः) परिच्छिन्नं द्रोणो व्रीहिः, आढकं व्रीहिः, खारी व्रीहिः इति चोच्यते, एवं समाना इयं वर्णश्रुतिः बहुधा मात्राभिः परिच्छिन्ना ह्रस्वो वर्णः, दीर्घो वर्णः, प्लुतो वर्ण इत्युच्यते । व्रीहिस्वरूपे तु यथा परिमाणपरिच्छेदो नास्ति, एवं श्रुतिस्वरूपे अपि कालपरिच्छेदो नास्ति ।

अपि च यथा एकत्र व्रीहिस्वरूपे दृष्टे तावन्मात्रेण सर्वव्रीहिविषयं सामान्याकारं ज्ञानम् उदेति इत्थं एकत्र एकस्यां वर्णश्रुतौ ज्ञातायां सर्वेषां तच्छ्रुतिमतां वर्णानां सामान्याकारं ज्ञानम् उदेति, ततः परं यो विशेषः प्रतिवर्णं तावन्मात्रकथनेन इष्टसिद्धिः । भूयिष्ठेषु वर्णेषु स विशेषः कालपरिच्छेदमात्ररूपः, यथा इकारे दर्शितम् । क्वचिद् अनेका वर्णश्रुतिः सम्भूय एको वर्णो भवति, यथा ऐ औ इत्यादौ । एतत् सर्वं ग्रन्थे स्पष्टं वक्ष्यते ।

वर्णश्रुतीनां प्रत्येकं स्पष्टस्य परिचयस्य प्राप्तव्यता ।।

सामान्यं व्रीहिस्वरूपम् अज्ञात्वा आढकव्रीहेः ज्ञानं यथा नोपपद्यते एवं वर्णश्रुतिज्ञानम् अन्तरा वर्णज्ञानं न सम्भवति इति स्पष्टम् । एवं सति यदि वर्णश्रुतेः सन्देहविभ्रमसङ्करादिरहित-ज्ञानरूपा परिच्छित्तिः न प्राप्यते, न शिक्षाध्ययनं सुसम्पन्नं भवति । तस्मात् सर्वा वर्णश्रुतिः प्रत्येकं परिचेतव्या, तन्नाम पदादिभ्यः पृथक्कृत्य स्वेन केवलेन इतरासङ्कीर्णेन शब्दात्मना निपुणं प्रज्ञेया । यथा हि शरीरसंस्थानं शिक्षमाणा भैषज्यविद्यारताः शरीरावयवान् प्रत्येकं परिचिन्वन्ति, एवं वर्णसंस्थानं शिक्षमाणाः शिक्षाजिज्ञासवः वर्णश्रुतीः प्रत्येकमेव परिचिनुयुः ।

तदर्थं प्रथमं वर्णग्रहणम् ।।

शिक्षाम् अध्येतुम् इच्छता वर्णश्रुतिप्रज्ञानाय प्रथमं सर्वेषां वर्णानां शुद्धम् उच्चारणं सम्यक् अभ्यसितव्यम् । तच्च यथासम्प्रदायं वेदं गृहीतवतां विपश्चितां मुखात् असकृत् श्रवणेन । स्वेन च क्रियमाणान् दोषान् तैः दोषज्ञैः परिष्कारयेत् । येन वेदाध्ययनं यथासम्प्रदायं कृतमस्ति तस्य इदं सर्वं सिद्धमेव ।

लिपेः भ्रामकत्वशक्तेः आत्मनः रक्षणीयत्वम् ।।

इदमत्र अवश्यवक्तव्यं यत् पूर्वोक्तौ वर्णश्रवणाभ्यासौ लिपेः 'सहायम्' अन्तरैव कर्तव्यौ। यतो हि भाषाभ्यासारम्भे एव (तच्च मातृभाषाविषये बाल्ये एव) प्रायेण सर्वत्र अभ्यस्यमाना लिपिः लोकव्यवहारे बहूपकारिण्यपि वर्णज्ञाने बहुधा प्रतिबध्नाति । तथाहि बहवो बालाः 'त' इत्यत्र कति वर्णा इति पृष्टाः एकस्तकार एव इत्याहुः, अकारम् अलक्षयन्तः । कतिपये च बालतराः 'अपि अस्ति' इत्यत्र कथं यण्सन्धिः, यावता 'पि' इति इकारः पकारात् पूर्वमस्ति इति मुह्यन्ति । एवं बहु वर्तते । तस्मात् लिपिः वर्णविषये महाप्रतिबन्धिका मन्तव्या ।

इत्थं लिपेः भ्रामकत्वादेव वेदाध्ययनं पुस्तकं विना कार्यमिति साम्प्रदायिका आहुः । तस्मात् सर्वदैव, यद्यपि वेदे विशेषतः, लिपिसहायम् अन्तरा श्रोत्रेणैव वर्णान् गृहीत्वा मनसा तान् शब्दात्मनैव सन्धारयेत् । ते च बालाः यथा 'त' इत्यत्र अकारोऽपि वर्तते इत्येवमादि सदा भ्रान्तिविमुक्तं स्मरेयुः तथा तेषु दृढं संस्कार आधेयः ।

एवमुक्ते इदमङ्गीकरोमि यत् शिक्षाशास्त्रस्य अध्ययनं प्रचारणं च लिपिसञ्चयात्मक-पुस्तकद्वारा कारयितुमिच्छन् अहमपि अपारमार्थिकं पन्थानमेव अगत्या आश्रितः । तस्मादेव प्रार्थये प्रौढाः अस्मात् पुस्तकरूपादपि ग्रन्थात् तात्पर्यविषयं स्वेन कौशलेन समधिगम्य शब्दरूपेण मनसा अवधार्य शब्दरूपेणैव बालेभ्यो बोधयन्तु इति । तथा क्रियमाणे अधीतिकाले कदाचित् पुस्तकापेक्षायां सम्भाव्यमानायामपि बोधाचरणप्रचारणकालेषु भगवत्कृपया शीघ्रमेव लिपिनिरपेक्षाः शिक्षाविदो भविष्यन्ति ते बालाः ।

वर्णश्रुतिप्रज्ञानस्य इतिकर्तव्यता ।।

प्रकृते च उक्तरीत्या वर्णान् अधिगम्य स्वयमेव निपुणतरं परीक्षेत तेषां स्वेनैव

क्रियमाणम् उच्चारणम्। नेत्रे निमील्य मनःपटलेऽपि लिपिम् अभावयन् उच्चार्यमाणान् वर्णान् स्वेन समनस्केन श्रोत्रेण सम्यक् शृणुयात्, उच्चारणक्षणम् एकमपि अपरित्यजन्।

वर्णस्थान् कालभेदान्, वर्णोच्चारणस्य प्रयोजकान् मुखस्थानाम् अवयवानां चेष्टाविशेषान्, यावन्तं कालम् एकैकस्मिन् वर्णे समानं शब्दस्वरूपं (समाना श्रुतिः) भवतीति च अन्वीक्षेत। दर्पणस्य पुरः स्थित्वा, अङ्गुल्यग्रेण गले स्पृष्ट्वा इत्येवं बहुभिः उपायैः उच्चारणे जायमानानि अङ्गविभ्रमादीनि जानीयात्।

जिज्ञासितस्य वर्णस्य इतरैः वर्णैः संयोगविप्रयोगौ परीक्षेत। यदि व्यत्ययः क्वापि जायते, तस्य कारणं तर्केण जिज्ञासेत अभ्यूहेच्च। इतरेषां (स्वस्य चापि) वर्णविषयिण्यो या भ्रान्तयः, ताभ्योऽपि वर्णस्वरूपम् अधिकृत्य बहु ज्ञातुं शक्यते। न हि निष्कारणो निरास्पदो भ्रमोऽस्ति।

सूक्ष्मानपि वर्णावयवान् सूक्ष्मतरया दृष्ट्या विविच्य लक्षयेत्। भवन्ति वै वर्णेषु मात्रापादमात्रकालाः अवयवाः, संयोगेषु पुनः वर्णाश्च तथाविधाः, पूर्वोत्तरैः उच्चारणैः बहुलम् अभिभूयमानाः। तेषां मैत्रीम् अवश्यं सम्पादयेत्। राजपुत्रमपि प्रजामित्रं हि प्रजाः अनुरज्यन्ते। एवं वर्णावयवान् प्रत्येकं जानते एव ते राजेति नमन्ति वश्याश्च भवन्ति।

उच्चारणपरीक्षाकाले स्वीयाः शास्त्रतो वा अशास्त्रतो वा सम्पादितपूर्वाः कल्पनाः विधूय परीक्षेत। ''नाभेः शब्द आयाति'' ''मूर्ध्नः शब्दो निस्सरति'' ''तालुनः ऊर्ध्वभागे निष्पद्यते'' इत्यादीनि वचनानि सर्वाणि तत्काले विस्मरेत्। वचनानि नानाभिप्रायाणि भवन्ति। परीक्षाम् अन्तरा तानि आपातार्थपराणि न वेति न सुखेन ज्ञेयम्।

तावता स्वपरीक्षायाम् अपि नातितराम् आद्रियेत। मानुषबुद्ध्या खलु क्रियते। क्वचित् सापि भ्रमं जनयति। ''शब्दार्थौ सत्कविरिव द्वयं विद्वान् अपेक्षते'' इत्युक्तरीत्या वचनस्य अनुभवस्य च परस्परान्वयं परीक्षेत इत्येतावदेव उच्यते, न तु वचनं परित्यजेदिति वा वचनमेव गृह्णीयादिति वा।

वचनोक्तं किञ्चिद् उच्चारणे नास्ति चेत् तत्र कारणं मार्गेत्। कारणं स्वस्य भ्रान्तिर्वा स्यात् वचनस्य अन्याभिप्रायकता वा। अत्यन्तमेव वचनं नानर्थकं भवितुमर्हति, परन्तु शब्दशास्त्रे बहूनि वचनानि आपाततः, प्रतीतिमात्रम् अवलम्ब्य वा उच्यन्ते मन्दमत्यनुग्रहाय। तस्मात् परीक्ष्यैव विजानीयात्।

एवं सम्यक् परीक्ष्य अनेन लेखकेन अधिगतमिदं शास्त्रं, निबद्धश्चायं ग्रन्थः। इच्छति

त्वयं यत् सर्वेऽपि इत्थं परीक्षां कृत्वैव वर्णान् विजानीयुरिति । तथा परीक्षितवताम् अपि तेषाम् अयं ग्रन्थः विषयसङ्ग्रहात्मकतया अङ्गुलिनिर्देशमात्रेण पथप्रदर्शकतया वा सप्रयोजन एव भवतीति मन्ये । तदशक्तानां तु बालानाम् अयं ग्रन्थः एव अपूर्वं प्रमाणं भवति ।

वर्णश्रुत्यभ्यासे सम्भाविताः परिहरणीयाश्च केचिद् दोषाः ॥

व्यञ्जनश्रुतीनां स्वतन्त्रोच्चारणे क्रियमाणे केचित् पूर्वत्र परत्र वा कञ्चित् स्वरवर्णं योजयन्ति । यथा 'क्' इत्यस्य उच्चारणे कर्तव्ये 'इक्कु' 'इक्' 'कु' इत्येवं बहुधा । तत् परिहरेत् । यद्यपि व्यञ्जनं परेण स्वरेण व्यज्यते इत्यस्ति प्रायोवादः, तथापि उपलभ्यते वेदसम्प्रदाये व्यञ्जनानां परस्वररहितानाम् उच्चारणं, 'विद्धान्' 'तस्मात्' इत्यादौ । यद्यपि व्यञ्जनान्ते कश्चित् स्वराभासो विच्छेदध्वनिः श्रूयते, तथापि 'विद्धानु' 'तस्मातु' इत्यादीनि अपभ्रंशरूपाणि विनैव उच्चारणं कर्तुं शक्यमिति स्पष्टं प्रतीयते । अत एव वेदं सम्यग् जानद्भ्यो वर्णान् अभ्यस्येत् इति पूर्वम् उक्तम् ।

हकारस्य विसर्गस्य च विवेकं बहवो न कुर्वन्ति (यतो हि बहवो न जानन्ति ?) । तथा अनुस्वारस्य स्थाने मकारं केचित् (प्रायो दाक्षिणात्याः), नकारं च केचित् (प्राय औत्तराहाः) उच्चारयन्ति । तथा अनुनासिकात् स्वरात् परं स्वरान्तरे सति मध्ये ङकारं पठन्ति – यथा 'देवाँ इह' इत्यस्य स्थाने 'देवाँङ् इह' इति ।

ऋकारे उभयतो विद्यमानौ स्वरभागौ केचित् शुद्धं नोच्चारयन्ति – तत्र 'रि' 'रु' इति प्रधानौ अपभ्रंशौ । एतौ अपभ्रंशौ अकृत्वा शुद्धतया उच्चारयामीति मन्यमाना अपि बहवः, उत्तरं स्वरभागं कृत्वाऽपि पूर्वं नैव कुर्वन्ति । केचित् पुनः अपरैः अपराद्धं समाधित्समाना इव परं स्वरभागं त्यक्त्वा 'अर्' इति पूर्वत्र अकारं योजयन्ति ।

शषसेषु बहवो भेदं न कुर्वन्ति । विशेषतः शषयोः । षकारे जिह्वा प्रतिवेष्टिता (वक्रीकृता) भवेत्, शकारे तु न । शकारे जिह्वामध्यं व्याप्रियेत, षकारे च जिह्वाग्रम् । एवं न कुर्वन्ति । उपध्मानीये च ओष्ठौ केवलौ अनुपयुज्य अधरोष्ठम् उत्तरदन्तेषु स्पर्शयन्ति, 'f' इति ।

अत्र सर्वत्र विषये शास्त्रानुमतिर्नास्ति । स्याद् भ्रान्तिरेव अज्ञानं वा एषां दुरुच्चारणानां मूलम् । सा च भ्रान्तिः अज्ञानं वा अञ्जसैव उन्मूलनीयम् इति कृत्वैव अपूर्णज्ञानोऽप्यहं शिक्षाप्रचारे अधुनैव प्रवृत्तः । तस्माद् भ्रान्तयोऽज्ञानानि च मूलघातं हन्यन्ताम् ।

कासांचन वर्णश्रुतीनां क्लेशावहानाम् अभ्यासोपायाः ॥

अथ कासांचिद् वर्णश्रुतीनाम् उच्चारणस्य अभ्यासे एव क्लेशो वर्तते। तत्र व्यञ्जनश्रुतीनां पूर्वोक्तदोषपरिहारेण स्वतन्त्रोच्चारणे एव क्लेशः स्यात्, अभ्यासेन तु सिध्यति।

अज्भक्त्याख्यस्य ऋकारादिस्वरभागस्य अयोगवाहानां च श्रुतेः अभ्यासे तु भूयान् क्लेशोऽस्ति। यतः ताः श्रुतयो न स्वतन्त्रतया क्वापि भाषायाम् उच्चार्यन्ते। अज्भक्तिश्रुतिर्हि ऋकाराद्यवयवत्वेनैव उच्चार्यते, अयोगवाहेषु च विसर्गानुस्वारौ पूर्वत्र कञ्चित् स्वरम् अपेक्षेते, जिह्वामूलीयोपध्मानीयौ च पूर्वत्र स्वरं परत्र च क-ख-प-फेषु कञ्चित्। तस्मात् एषां श्रुतेः व्यपवृज्य (पृथक्कृत्य) उच्चारणे अवश्यं क्लेशो भवति। अत्र कांश्चन उपायान् कथयामः।

१) विसर्गस्य श्रुतिः

हकारविसर्गयोः भेदः प्रथमम् उच्यते – हकारस्य श्रुतौ घोषो नाम कम्पनधर्मो वर्तते, तस्मात् कठोरतरो हकारः। विसर्गस्य श्रुतौ पुनः घोषो नास्ति, तस्मादसौ मृदुतरः। एष एव अनयोर्भेदः। तस्मात् प्रथमं –

सः - सह, स्वाः - स्वाहा, स्वपिः - स्वपिहि इत्यादिषु सहजेषु स्थलेषु

धीः - धीहि, गुरुः - गुरुहु इत्यादिषु च कृत्रिमेषु स्थलेषु

हकारं कम्पनेन कर्कशं, विसर्गं तु तदभावेन मृदुं कुर्वन् तयोः विवेकम् अभ्यस्येत्। हकारात् परं स्वरोऽस्ति, विसर्गात् परं तु नास्ति इत्येष न विषयः। तद्भ्रान्तिनिरासाय, यदा कम्पनकार्कश्यं तदभावमृदुत्वं च हकारविसर्गयोः अभ्यस्तं, ततः परं तयोः श्रुती केवले एव [ह्] [‘:’] इत्यभ्यस्येत् क्रमेण व्युत्क्रमेण क्रमेण व्युत्क्रमेण इति। इत्थं स्पष्टं विलक्षणे इमे कुर्वन् वशं नयेत्।

२) अनुस्वारस्य श्रुतिः

अनुस्वारस्य श्रुतिं चिकीर्षन् न मकारस्य कुर्यात् न नकारस्य। इत्थं कुर्यात् – मकारस्येव करिष्यन् यथा ओष्ठोपसंहारे प्रवर्तेत तथा प्रवर्तेत, ओष्ठौ तु न संस्पर्शयेत्। अथ हनू उपसंहरेत्, यथा दन्तपङ्क्त्योः परस्परं संस्पर्शो भवति। यदि हनूपसंहारवशाद् ओष्ठौ ईषद् अन्योन्यं स्पृशेतां, न दोषः। मकारस्य श्रुतौ इव प्रयत्नपूर्वको बलवान् स्पर्शस्तु तयोः नैव कार्यः। इत्थं हनू उपसंहृत्य जिह्वां निर्व्यापारां कृत्वा अथ नासिकया उच्चारयेत्। एषा श्रुतिः अनुस्वारस्य।

अत्र यदि ओष्ठपीडनं स्याद्, मकारश्रुतिः स्यात् । यदि हनूपसंहारो न स्याद्, मुखविवरेण वायोः निर्गमनाद् अनुनासिका स्वरश्रुतिः स्यात् । यदि जिह्वाव्यापारेण क्वापि स्पर्शनं स्याद् मकारभिन्नस्य अनुनासिकस्य व्यञ्जनस्य श्रुतिः स्यात् । एषां दोषाणां परिहारेण अनुनासिकतया उच्चारिता श्रुतिः अनुस्वारस्यैव भवितुमर्हति, नान्या । 'नासिकाऽनुस्वारस्य' इति हि केवलनासिकास्थानत्वम् अनुस्वारस्य प्रसिद्धम् । तच्च एतं प्रकारमन्तरा अन्यथा न साध्यम् ।

३) जिह्वामूलीयोपध्मानीययोः श्रुती

अत्र अध्यारोपापवादाभ्याम् इत्थं शिक्षेत । 'राम≻करोति' 'राम≺पठति' इति प्रसिद्धं वाक्ये तौ उच्चार्य, अथ 'म≻क' 'म≺प' इति खण्डमुच्चार्य, अथ 'अ≻क' 'अ≺प' इति, अथ 'अ≻क्' 'अ≺प्' इति, अथ मुख्यालम्बनौ कपौ प्रधानमल्लनिबर्हणन्यायेन प्रथमं पातयेत् 'अ≻' 'अ≺' इति । ततः गौणालम्बनं स्वरमपि त्यक्त्वा [≻] [≺] इति श्रुतेः उच्चारणं अभ्यस्येत् । उपध्मानीये च पूर्वोक्तरीत्या [f] इति भाषान्तरीयां श्रुतिमकृत्वा ओष्ठौ एव स्पर्शयेत् ।

४) अज्भक्तेः श्रुतिः

अध्यारोपापवादौ एव पूर्ववत् आस्थाय 'पितॄन्' 'तॄन्' 'ऋन्' 'ऋ' इति क्रमेण प्रत्येकं बहुकृत्व उच्चारयन् ऋकारोच्चारणं निपुणं समीक्षेत । तत्र 'ऋन्' इत्यत्र रेफश्रुतेः नकारश्रुतेश्च मध्ये यत् स्वरसदृशं व्यञ्जनविलक्षणं शब्दस्वरूपम् अस्ति सैव अज्भक्तेः श्रुतिः । सैव च अल्पकालं श्रूयेत 'तॄन्' इत्यत्र तकारश्रुतेः रेफश्रुतेश्च मध्ये । त्वराम् उद्वेगं च वर्जयित्वा इदं परीक्ष्यताम् । यदि तश्रुतिरश्रुत्योः मध्ये न किञ्चिद् उच्चार्यते, अन्या वा श्रुतिरुच्चार्यते, शोधनीयमेव उच्चारणं, तत्र अज्भक्तिश्रुतेः अवश्यप्रयोक्तव्यत्वात् ।

अत्र प्रसङ्गादुच्यते । 'कृतम्' इत्यादौ ह्रस्वे ऋकारेऽपि सैव अज्भक्तिश्रुतिः रेफश्रुतिम् उभयतः, तन्नाम कश्रुतिरश्रुतिमध्ये तथा रश्रुतितश्रुतिमध्ये च अस्ति इति निश्चिनुयात् । इत्थं लश्रुतिं परितः 'क्लृप्तम्' इत्यादौ । एवं कृते सति प्रथमतः ऋकारादीनां शुद्धमुच्चारणं सम्पादितं स्यात् ।

अतः परं या सा 'ऋन्' इत्यत्र 'र्...न्' इति रश्रुतिनश्रुत्योः मध्ये परिचिता अज्भक्तिश्रुतिः, तामेव केवलाम् अभ्यस्येत् । तावद् अभ्यस्येत् यावता सुप्तोत्थापितेनापि शुद्धं केवलं च तस्या उच्चारणं कर्तुं शक्यं भवति ।

वर्णश्रुतीनां परेभ्यो बोधनम्॥

पूर्वोक्तरीत्या अभ्यस्य प्रज्ञाय वर्णान् वर्णश्रुतीश्च यदा परेभ्यो बोधयेत्, तदा अवश्यम् इमा वर्णश्रुतीः पृथक्पृथग् उच्चार्यैव प्रदर्शयेत्। श्रुतीनां कालपरिच्छेदो नास्तीति स्मरेत्। तस्मात् बोधनकाले यावता कालेन उच्चार्यमाणाः वर्णाः विद्यार्थिभिः सुग्रहाः भवन्ति तावन्तं कालं कामम् उच्चारयेत्। यद्यपि क् ख् इत्यादिषु केषुचिद् व्यञ्जनेषु श्रुतीनां चिरम् उच्चारणं दुश्शकम्। तथापि सुदैवात् तेषु विद्यार्थिनां महान् क्लेशो न प्रायो दृश्यते। शषसानां विवेकं तु कुर्यात्।

हकारस्य विसर्गस्य च श्रुतौ भेदं सम्यक् प्रदर्शयेत्। अनुस्वारे मनौ वारयेत्। उपध्मानीये च 'f' इत्येतम्। इतरांश्च दोषान् यथादर्शं नक्रग्राहं गृहीत्वा परिहरेत्।

अथ वर्णश्रुतिषु सुगृहीतासु वर्णबोधने अनुनासिकेषु स्वरेषु ङकारं परिहारयेत्। ह्रस्वान् ह्रसयेत्, दीर्घान् द्राघयेत्, प्लुतान् प्लावयेत्। बहुलं विद्यार्थिनः पदान्ते दीर्घान् ह्रसयन्ति। एवं दोषा अनन्ताः, तत्सङ्ख्याने माहं प्रवर्तिषि। सर्वविधेषु दोषेषु जागरूकः तान् वारयेदिति पुनःपुनरुक्तमपि इदं न दोषाय भवति।

यत्र वर्णश्रुत्यभ्यासे क्लेशः स्याद् तत्र पूर्वोक्तान् अन्यान् वा स्वप्रतिभाभासितान् उपायान् आश्रयेत्। श्रुतीनां शुद्धौ साधितायां वर्णशुद्धिः नेदीयसी भवति। तस्मात् वर्णश्रुत्यभ्यासे क्लेशो यद्यप्यनुभूयेत, अथापि 'यत्तदग्रे विषमिव परिणामेऽमृतोपमं तत्सुखं सात्त्विकं प्रोक्तम् आत्मबुद्धिप्रसादजम्' इति भगवता गीतायाम् (१८-३७) उपदिष्टं स्मरद्भिः अवश्यं प्रयतनीयं प्रवर्तितव्यं चेति प्रार्थये।

इत्थं वर्णश्रुतिप्रज्ञानं यथामति विवृतम्॥

* * *

ॐ

।। अनुबन्धः - २ ।।

।। ग्रन्थसमर्थनम् ।।

अस्यां शिक्षाप्रथमकृत्यां सन्ति कानिचित् स्थलानि यत्र प्रसिद्धः प्राचीनो वर्णविषयनिरूपणक्रमः परित्यक्तः । अत्र कारणं तु प्राचीनस्य क्रमस्य अनुसरणे अद्यतनानां बालानां नाऽसा वर्णस्वरूपावधारणे सौष्ठवं भवतीत्येतदेव । न तु वयं पारमर्षेषु सूत्रेषु कञ्चिद् दोषमुद्भावयितुं धृष्णुमो मूढा इव ।

तर्कयामहे महात्मभिस्तत्रभवद्भिः अतिसूक्ष्मदर्शिभिः स्वशिष्यान् स्वानुरूपान् धीमतः अधिकारिणः उद्दिश्य सूत्रादयो ग्रन्था व्यरचिषत । सूत्रगर्भे धृतास्तु बहवो निगूढा विषयाः प्रायो गुरुमुखपरम्परयैव शिष्येषु अवतारिताः, ते च ततो ग्रन्थनिबन्धं नान्वभवन् । गच्छता च कालेन शास्त्रपरम्परालोपे महति सञ्जाते बहव इमे विषयाः स्वीयां सूत्रस्वभावोत्थां निगूढतामेव अपीताः ।

अद्य तावत् बालाः शास्त्रविद्याम् आर्जयितुम् आयान्तीत्येव दुर्लभदर्शनं, तत्र यदि ते कोमलमतितया सूत्रसूचितान् विषयान् अध्यक्षयितुं नेशते, को नु सहृदयस्तान् दोषभाजो मन्येत ! अस्माभिरेव प्रत्युत शास्त्रेषु अनुभववत्तरैः ते स्वानुकूललघुतरग्रन्थप्रदानेन अनुग्राह्या भवन्ति । तस्मादेव मया विद्वत्तराणाम् अपेक्षया अल्पज्ञेनापि बालेभ्योऽहं भूयो वेद्मि इति आत्मनि धैर्यम् आवाह्य प्रातिशाख्यादिभ्यो ग्रन्थेभ्यः अधिगन्तुं शक्या एवापि विषया एतद्ग्रन्थात्मना निबद्धाः ।

परं तत्र क्वचित्क्वचित् पश्यामि स्थलानि यत्र शिक्षाप्रातिशाख्यानि विदुषां व्याकरणं विदुषां वा प्रश्नाः उद्भवेयुः किम्प्रमाणम् इदम् अस्य वचनमिति । तानिमान् सम्भाव्यमानान् प्रश्नान् उत्तरीतुम् अत्र सम्प्रति प्रयते ।।

तत्रेदम् आदौ उच्यते । इह शास्त्रे ग्रन्थे च यो मया श्रुतिवर्णयोः विवेको नियततया परिरक्षितः, स किञ्चिदिव समर्थनेऽस्मिन् शिथिलीकृतः प्रतिपादनसौकर्याय । एवं च वर्णमात्रे परामृश्यमानेऽपि वर्णश्रुतेरेव वास्तवः परामर्श इति यथायोग्यं सुधियः स्वयं तत्रतत्र ऊहन्ताम् ।।

१) ग्रन्थस्था विषयाः कुतः सङ्गृहीताः ?

प्राधान्येन सव्याख्यं महाभाष्यं, पाणिनीयशिक्षा, व्यासशिक्षा, तैत्तिरीयप्रातिशाख्यं,

क्वचिच्च ऋग्वेदप्रातिशाख्यं, याज्ञवल्क्यशिक्षा च मम उपाकुर्वन्। मन्ये च स्मृत्यन्तरैः प्रत्यक्षविरोधः मदीये निरूपणे न भवति। किञ्च अत्र पाणिनीयायाः लौकिक्या एव भाषायाः वर्णनिरूपणे प्रवृत्तं, न वैदिक्याः। वेदे हि प्रतिशाखं भवा विशेषाः वर्णादिविषयाः तत्तत्प्रातिशाख्यादेव अधिगन्तव्याः। यावानेवांशः लौकिकभाषाविषयासु स्मृतिषु न लभ्यते, तावानेव वेदविषयेभ्यः शिक्षाप्रातिशाख्येभ्यो गृहीतः, प्रातिशाख्यान्तरैश्चेत् सोऽविरुद्धो भवति।

परन्तु इदं वक्तव्यम्। प्राचीनेषु ग्रन्थेषु यया रीत्या विषया निरूपिताः तेषामेव विषयाणां रीत्यन्तरेण निरूपणं तत्रतत्र कृतम्। तत्तु न दोषाय भवति। यदि दोष एवेत्युच्येत, कोऽत्र दोष इत्युच्यताम्। यदि प्राचीनरीतिपरित्याग एव, नैतत् सारम्। प्राचीनरीत्यनुसरणाग्रहेण हि महर्षिवाक्यनिश्छिद्रतायां श्रद्धातिशय एव द्योतितो भवति। परं किं तेन ? इह बालान् मनसि निधाय प्रवर्तितव्यं न ऋषीन्। ऋषयोऽपि हि बालानेव स्म उद्दिश्य ग्रन्थान् प्रणयन्ति। यदि वयं तेभ्यः प्राप्तविद्या भूत्वा अस्मत् प्राप्स्यमानविद्यान् बालानुद्दिश्य रीत्यन्तरेण प्रतिपादयेम तानेव विषयान्, अवश्यं ते मोदेरन्नेवेति मे विश्वासस्तेषु करुणात्मसु।

न चेयं वेदशब्दविद्या इव वेदान्तार्थविद्या इव वा सर्वैरंशैः ऋषिमात्रवेद्या, येन अनृषिभिः तस्या यथावच्छ्रवणेन अक्षरशः पुनःप्रतिपादनमात्रं कर्तुं शक्यं स्वयम् अशक्तत्वात् तद्विषयाणां दर्शने। ज्यौतिषशास्त्रे इव तु प्रत्यक्षस्य लौकिकस्यैव वस्तुनः अलौकिकाय प्रयोजनाय 'भूतं भव्यायोपदिश्यते' इत्युक्तया रीत्या परिष्कृत्य व्यवस्थाप्य धर्मानुष्ठानाय प्रतिपादनमत्र क्रियते।

तस्मात् विषयस्य लौकिकत्वात् तस्य प्रतिपादने बालानुग्रहार्थं रीत्यन्तराश्रयणे कथमिव मुनयः पुराणाः कुप्येयुः ? बहु हि ते पाणिन्यादय आचार्या बालानुग्रहे अभिनिविशन्ते। कतिकति न सूत्राणि रचितानि प्रपञ्चार्थानि स्पष्टतार्थानि वा पाणिनिप्रभृतिभिः विषयान्तरेष्वत्यन्तमेव अक्षरलाघवपक्षपातिभिरपि आचार्यैः ? सर्वथा बालानुग्रह एव आद्यकर्तव्यमाचार्याणां, बालार्थं चैव तैः सूत्राणि प्रणीतानि भाष्याणि रचितानि व्याख्याश्च निरमायिषत। तस्मात् बालार्थं क्रियमाणमिदं सहृदयैः भूत्वा नैव दोषो मन्तव्यम् इति विज्ञापयामि।

अत्र च मया पुस्तकशरीरवृद्धिभिया न प्रतिविषयं प्रमाणप्रदर्शनादिकं क्रियते। विषयेषु तु यथा दोषा न स्युः, तथा प्रयत्नम्। अथ ग्रन्थं समर्थनं च पठित्वाऽपि यदि सन्देहः स्यात् प्रस्तावनादत्ते सङ्केते पृच्छ्यताम्॥

२) रेफस्य अन्तस्स्थात्वं कुतो नोक्तम् ? अपि च कोऽयं रिफितं नाम संसर्गः ?

रेफस्य उत्पादकः प्रयत्नः न केवलम् इतरासु अन्तस्स्थास्विव ईषत्स्पृष्टः । यद्यपि तत्र ईषत्स्पृष्टताऽपि वक्तुं शक्या, ईषदेव अल्पकालमेव स्थानकरणयोः एकैकस्या आहतेः अवस्थानात् । तथापि तत्र रिफितत्वं नाम धर्मोऽस्ति अधिकः, स च ऋषिभिः रेफेतिशब्दे अन्तर्गीर्भितः कृतः अवश्याभिव्यञ्जनीयतया मया चिन्तितश्च ।

तथा हि तैत्तिरीयप्रातिशाख्ये 'एफस्तु रस्य' इति सूत्रे (१-१९) वैदिकाभरणाख्यायां व्याख्यायां कथ्यते अतिप्राचीनश्रौतसूत्रकारप्रयोगं प्रदर्श्य – ''रिफ्यते विपाट्यते वस्त्रादिपाटनध्वनिवद् उच्चार्यत इति रेफः । तथा च याज्यान्तविसर्जनीयस्य आदेशविधौ आह आश्वलायनः 'विसर्जनीयः रिफ्यते' '' इति । अत्र हि सत्यपि ''रोगाख्यायां ण्वुल् बहुलम्'' इति (३-३-१०८) पाणिनीयस्य सूत्रस्य ''रादिफः'' इति वार्तिके, तत्रभवता आश्वलायनेन अस्मिन्नर्थे उपयुक्तत्वात् ''रिफ कत्थनयुद्धनिन्दाहिंसादानेषु'' इत्यस्मात् तौदादिकाद् धातोरपि रेफशब्दो भवतीति गम्यते । तत्र च विपाटनरूपा हिंसा धात्वर्थः । तत्रापि वस्त्रविपाटनं विशिष्य दृष्टान्ततया उपात्तम् । अस्मिन् दृष्टान्ते अस्ति किञ्चित् निगूढं स्वारस्यं येन अस्मदुक्तस्य रिफितसंसर्गस्य स्वरूपं, तद्विशिष्टत्वात् रेफस्य इतराभ्योऽन्तस्स्थाभ्यो विलक्षणता च संसिध्येत् । तच्च किम् ? श्रूयताम् ।

वस्त्रस्य स्वरूपं तावत् ओतप्रोतास्तन्तवः । प्रत्येकं तन्तोः विपाटने एव च वस्त्रं विपाट्येत । पाटनं च अत्र विभागानुकूला क्रिया । यावता अनेके तन्तवः, अनेके विभागाः, अनेकाश्च तदुत्पादिकाः क्रियाः । अनेकाभिः क्रियाभिः अनेकेषु विभागेषु जन्यमानेषु अनेके तज्जनिताः शब्दाः ''र्-र्-र्'' इति समुदिताः श्रूयन्ते वस्त्रपाटनध्वनिरिति ।

एतद्दृष्टान्तेन रेफेऽपि अनेकाः शब्दजनिकाः क्रियाः । अनुभवेन, परं कदाचित् सूक्ष्मेक्षिकयैव स्वयं संवेद्यमिदं यत् रेफे स्थानकरणयोः असकृदाहतिः भवति । इतरेषु यद्यपि निखिलेषु व्यञ्जनेषु स्थानकरणयोः सकृदेव शब्दोत्पादकः संयोगः, तन्नाशे च पुनरन्या एव वर्णव्यक्तिः स्यात् न तु सैव, तथापि रेफे अवश्यम् एकस्यापि रेफस्य उत्पत्तये स्थानकरणयोः असकृत् संयोगोऽपेक्षितः । अयमेवार्थो वस्त्रपाटनदृष्टान्तेन विशदीक्रियते । इयांस्तु विशेषो यत् दृष्टान्ते विभागजः शब्दः, दार्ष्टान्तिके तु संयोगजः इति । एतावता तु दृष्टान्ततायां न किञ्चित् छिन्नम् ।

तस्मात् रेफेति नाम्नैव अस्य वर्णस्य प्राचीनैः व्यवहारः कृतः इदमसंशयं गमयति यत् प्राचीनैरपि ईदृशोऽस्य असकृदाहतिजन्यत्वरूपो धर्मो लक्षितः अभिमतश्च इति । यथा अन्यानि विसर्जनीयः, अनुस्वारः, जिह्वामूलीयः, उपध्मानीयः इत्यादीनि वर्णानाम् अन्वर्थनामानि तन्निष्ठं वायुविसर्जनप्रायत्वं, नासिकानुसृतस्वरणजन्यत्वं, जिह्वामूलकरणोत्पत्तिकत्वम्, उपध्मानाख्येन आस्यवायुपूरणरूपेण प्रयत्नेन जन्यत्वम् इत्यादिरूपं कञ्चित् धर्मं व्यपदिशन्ति, एवं रेफेति नामापि तस्य रेफणेन असकृदाहतिरूपेण धर्मेण जन्यत्वं कथयति । एतदेव विस्फुटमाख्यातुं मया स्पृष्टविवृतादिवत् रिफितेति भावक्तान्तेन तादृशो विलक्षणः प्रयत्नः अभिहितः, तद्वैशिष्ट्येन च रेफः इतराभ्योऽन्तस्स्थाभ्यः उत्कृष्य प्रदर्शितः ॥

३) जिह्वामूलीयः उपध्मानीयश्च कुतः ऊष्मगणे योजितौ ? हकारश्च ततः कुतो व्यपवृक्तः कृतः ?

लोके तावत् भाषायां वर्णानां प्रयोगरीतिं परिशील्य वर्णाः परिगणिता विभक्ताश्च । शिक्षायां तु वयं वर्णान् स्वरूपतो विभजामो न प्रयोगतः ।

लोके हकारोऽपि इतरव्यञ्जनवत् प्रयुज्यते पदानामादौ मध्ये च, प्राकृतः (सन्धिं विनापि स्वयं सिद्धः) च भवति, यथा कठः मठः शठः एवं हठः, यथा अरिः अलिः अविः एवम् अहिः । तस्मात् स व्यञ्जनेषु परिगणितः । तत्रापि स शषसवत् शब्दरूपाणि प्रयोजयति – यथा ''शल इगुपधादनिटः क्सः'' (३-१-४५) इत्यनेन पाणिनीयसूत्रेण यथा क्रुशेः अक्रुक्षत्, कृषेः अकृक्षत् एवं लिहेः अलिक्षत् – इति कृत्वा स शषसैः सह ऊष्मसु पठितः ।

जिह्वामूलीयोपध्मानीयौ तु नैवं पदस्य आदौ मध्ये वा क्वचित् श्रूयेते, प्राकृतौ च कदापि न भवतः । तस्मात् तौ न व्यञ्जनगणे पठितौ लोके नतराम् ऊष्मसु ।

अत्र तु शिक्षायां वर्णानां स्वरूपे परिशील्यमाने यथा इतरेषु व्यञ्जनेषु स्थानकरणयोः संस्पर्शो वर्तते, एवमनयोरपि । तत्रापि यथा ऊष्मसु ईषद्विवृतसंसर्गो वर्तते, एवमनयोरपि । तस्माद् इमौ ऊष्मभिः पठितौ । हकारे तु न कयोश्चिद् अङ्गयोः संस्पर्शः, न वा ईषद्विवृतसंसर्गः । तस्मात् स व्यञ्जनेभ्यः पृथगकारि ।

किञ्च विसर्गेणास्य साधर्म्यम् । उभावपि कण्ठातिरिक्ते शरीरावयवे प्रयत्नं नापेक्षेते । उभावपि आलम्बस्वरस्य धर्मान् अधिगृह्णीतः स्वम् एकस्वरूपम् अजहतौ । तथोक्तं तैत्तिरीय-प्रातिशाख्ये (२-४७,४८) । तस्माद् हकारो विसर्गेण सह पठितः 'केवलकण्ठ्यः' इति ॥

४) श्रुत्यादीनां शब्दानाम् एष्वर्थेषु प्रयोगे किं प्रमाणम् ?

श्रुति-शब्दः अस्मदभिप्रेते अर्थे प्रयुक्तस्तत्रभवता महाभाष्यकारेण एओङ्-ऐऔच्-सूत्रे वर्णैकदेशग्रहणविचारे ''कृपो रो लः'' इति सूत्रव्याख्यानावसरे – 'रश्रुतेः लश्रुतिर्भवति' इति। **अज्भक्ति**-शब्दः ''रषाभ्याम्'' इति सूत्रे (८-४-१) उद्द्योते (महाभाष्योपव्याख्याने) प्रयुक्तः। **पृक्तस्वर**-शब्दश्च तैत्तिरीयप्रातिशाख्ये (१३-१६)। **अनुप्रदान-संसर्ग**-शब्दावपि तत्रैव (२३-२,८)। **केवलकण्ठ्य**-शब्दः निगदव्याख्यातो यौगिकः। **उपस्वर**-शब्दः मयैव प्रवर्तितः उपाध्यक्षादिवत् स्वरसादृश्यज्ञापनाय इत्युक्तम्। **घोषतन्त्री**-शब्दः यौगिकः घोषजनिका तन्त्रीरिव तन्त्रीः इति। **नासिकास्थान**-शब्दः प्रसिद्धबाह्यनासिकाव्यावृत्तये मया प्रवर्तितः नासिकाख्यम् अनुस्वारादीनां स्थानमिति मत्वा। तद्वाच्यश्च स शरीरावयवो यः आनुनासिक्यजनकव्यापार-विशेषाश्रयः। स चास्मिन् ग्रन्थे आस्यबिलनासिकाबिलयोः सन्धिरिति प्रदर्शित एव। **रिफित**-शब्दो व्याख्यातः अत्रैव समर्थने द्वितीयप्रश्ने। **अन्ततईषत्स्पृष्टः मध्यतईषत्स्पृष्टः** इत्येतौ शब्दौ यौगिकौ मतौ, अन्तेन मध्येन इति तृतीयायाः सार्वविभक्तिकेन तसिना प्रतिनिधाने ईषत्स्पृष्टशब्देन सुप् सुपेति समासे। अर्थस्तु ग्रन्थे एव व्याख्यातः। **कोमलतालु**-शब्दश्च कोमलः मृदुः तालुप्रदेशः इत्यर्थे यौगिकः स्पष्ट एव। **बर्स्व**-शब्दः प्रत्यक्षं वेदे पठ्यते अश्वमेधप्रकरणे अस्मिन्नेवार्थे। तैत्तिरीयप्रातिशाख्ये (२-१८) च तस्य पृक्तस्वरविषयता उक्ता। **प्रण्यस्त**-शब्दश्च जिह्वाविषयः तत्रैव (२-२०)। **अभिमूल-अभिमध्य-अभ्यग्र**-शब्दाः ताल्वाद्यवयवान् अभिगतानि जिह्वाया मूलमध्याग्राणि अत्र इत्यर्थे यौगिका अभिमताः॥

५) स्वरहकारादिषु स्थानकरणे न स्त इत्युच्यते। इदम् ''इचुयशानां तालु'' इत्यादिभिः वचनैः विरुध्यते ननु ?

पुनः स्मारयामि – विषयनिरूपणक्रमे अन्यथात्वं न अप्रामाण्याय कल्पते। प्रकृते च स्थानत्वकरणत्वयोः स्पष्टतरा प्रतीतिः तत्रास्ति यत्र वस्तुतः कीदृशश्चित् स्पर्शः अत्यन्तसामीप्यं वा वर्तते द्वयोरङ्गयोः। तच्च व्यञ्जनश्रुतिष्वेव। तत्रैव तर्हि स्थानकरणपरिभाषया प्रतिपादनं सुकरम्।

अपि च स्वरश्रुतिषु नाना अङ्गानि नाना रूपेण व्याप्रियन्ते। यथा ओकारे हन्वोः व्यस्तता उच्यते ओष्ठयोश्च उपसंहारः (तैत्तिरीयप्रातिशाख्ये २-१३,१४)। तत्र यदि स्थानकरणव्यपदेशाग्रहेण उत्तरा हनुः ओष्ठश्च स्थानम् अधरौ च तौ करणम् इत्युच्यते, तत्र न

ज्ञायते कथं कृत्वा हनुभ्याम् ओष्ठाभ्यां च ओकारो निष्पादनीय इति । प्रयोगाद् ज्ञास्यत इति तु नोत्तरं भवति, यदा प्रकारान्तरेण स्पष्टतरं कथनं सम्भवति ।

''इचुयशानां तालु'' इत्यादीनि वचनानि तु वैयाकरणैः स्वप्रक्रियानिर्वाहमात्रार्थम् उद्धृतानि । यान्यपि तादृशानि वाक्यानि शिक्षाग्रन्थेष्वेव दृश्यन्ते, तानि आपातपरिचयार्थान्येव । प्रतरां हि विषयनिरूपणं तैत्तिरीयप्रातिशाख्यकारेण कृतम् – ''ओष्ठौ तूपसंहततरौ'' (२-१४) ''उपसंहततरे हनू'' (२-१८) ''अनादेशे प्रण्यस्ता जिह्वा'' (२-२०) इत्यादिषु सविशेषकथनेषु वाक्येषु, स्थानकरणमात्रव्यपदेशे अपर्याप्तिं पश्यता ।

तस्मादस्माभिः व्यञ्जनेतरश्रुतिषु स्थानकरणव्यपदेशे फल्गुतां पश्यद्भिः तदत्यन्तायात्र परिहृतम् । अत एव अस्मद्ग्रन्थे 'द्वयोरेव अवयवयोः सम्बन्धः संसर्गः' इति ३९ सूत्रे वृत्त्यां च, 'व्यञ्जनेतरेषां न सम्बन्धः' इति ४३ सूत्रे च उक्तम् ।

एवं रीत्यन्तरेण प्रतिपादनेऽपि उच्यमानो विषयः पावकतप्तं हिरण्यमिव परिशुद्धः शास्त्रमूल एव । यथा च सर्वे व्यञ्जनेतरश्रुतिसम्बद्धा विषयाः इचुयशादिवाक्योक्ताः अत्रापि सङ्गृह्यन्ते ते प्रायेण सुधीभिरेव स्वयमूहितुं शक्याः । अथापि तत्र द्वित्रा इह समर्थनाय उच्यन्ते ।

अकारस्य कण्ठस्थानत्वं तस्मिन् उच्चार्ये कण्ठादूर्ध्वम् आस्ये अन्यस्य व्यापारस्य अभावमेव दर्शयति । कण्ठो हि सर्वेष्वेव वर्णेषु अनुप्रदानोत्पादने व्याप्रियते इति सामान्यं 'स्थानं' तत् सर्ववर्णानाम् । तेनास्य विशिष्य स्थानतया कथनम् अवयवान्तरव्यापारस्य पर्युदासायैव । स च तथा अवयवान्तराणाम् अकारश्रुतौ आकारश्रुतौ च सर्वथा अव्यापारः सम्यगेव ग्रन्थे रक्षितः ।

ऋऌ इत्यनयोः वर्णयोः मूर्धदन्तस्थानताकथनं तदन्तर्गतयोः रेफलकारश्रुत्योः तत्तत्स्थानत्वादेव । एदैतोः कण्ठतालु ओदौतोः कण्ठोष्ठम् इति च वचने तत्र अदितोः अदुतोश्च प्रश्लेषम् अभिप्रेत्य, गुणवृद्धिसन्ध्योः आन्तरतम्येनैव आदेशनियमनं भवत्विति मत्वा च प्रवृत्तम् ।

हकारविसर्गयोर्विषयः पूर्वमेवोक्तः । तौ कण्ठातिरिक्ते अवयवे प्रयत्नं नापेक्षेते इत्यतः कण्ठादूर्ध्वं स्थानकरणव्यापारः तयोः न सम्भवति । अनुस्वारविषयस्तु पश्चात् पृथग्वक्ष्यते ।।

६) ह्रस्वाकारभिन्नानामेव स्वराणां विवृतप्रयत्नजन्यता शास्त्रदृष्टा । कथं ह्रस्वाकारस्यापि तथात्वमुच्यते ?

आस्ये कयोश्चिदप्यवयवयोः संस्पर्शादिस्पष्टतरसम्बन्धाभाव एव विवृतः संसर्गः इति अत्र

ग्रन्थे स्वीकृतम् । तच्च अकारेऽपि अविशिष्टम् । अकारस्य संवृतता प्राचीनैरुक्ता तत्र हन्वोः परस्परनिकटतामेव प्रतिपादयति, तच्चास्माभिः उक्तमेव ।

ननु अत्र ग्रन्थे अकारश्रुतिभिन्नानामपि इवर्णस्य उवर्णस्य अञ्भक्तेश्च श्रुतीनां संवृतहनुजन्यत्वम् उच्यते । तासां तु संवृतप्रयत्नता प्राचीनैर्नोक्ता । तत्र किं समर्थनम् ?

उच्यते । तास्वपि इवर्णादिश्रुतिषु संवृतया हन्वा उच्चारणं सर्ववेदसम्प्रदाये वर्तते इति मया ग्रन्थे तथैवोक्तम् । प्राचीनैः संवृतप्रयत्नत्वस्य अकथने तु यथामति समर्थनं वच्मि । इवर्णादौ ह्रस्वदीर्घप्लुताः त्रयस्त्रयः सवर्णाः समानश्रुतय एव सन्ति । अवर्णे तु ह्रस्वः दीर्घप्लुताभ्यां सवर्णः सन्नपि संवृतहनुजन्यतया विलक्षणश्रुतिको वर्तते । तेन तत्रैव ह्रस्वस्य संवृतताया विशेषेण कथनीयत्वमापद्यते । इतरत्र तु ये संवृतहनुकाः ते सर्वेऽपि विवृतसंसर्गा एव इति संसर्गमाश्रित्य विवृतप्रयत्नता तेषां समानतया उक्ता । इदं समर्थनं स्थितगतिचिन्तनमेव इति तु अङ्गीकरोमि ॥

७) कवर्गस्य स्थानं कण्ठः, ''अकुहविसर्जनीयानां कण्ठः'' इति वचनात् । कथं तस्य अन्यत् स्थानमुच्यते ?

''अकुहविसर्जनीयानां कण्ठः'' इति शिक्षान्तरवचनं दीक्षितैः कौमुद्यां परिपठितम् । तत्र लोकः सर्वो भ्राम्यति – यदेव अहविसर्गाणां स्थानं तदेव कवर्गस्येति । अस्यैव तु कौमुदीपरिपाठस्य व्याख्याने लघुशब्देन्दुशेखरे उक्तम्, ''अत्र कण्ठपदं कण्ठस्थान-तत्समीपजिह्वामूलस्थान-उभयपरं, तेन 'कण्ठ्यौ अहौ', 'जिह्वामूले तु कुः प्रोक्तः' इति शिक्षया न विरोधः'' । एवं च कवर्गस्थानकण्ठो नैव हकारविसर्गकण्ठ इति वैयाकरणानामपि अविरुद्धम् ।

अस्माभिस्तु यद्यपि जिह्वामूलमपि कवर्गस्य स्थानतया नोक्तं, तथापि ३४ सूत्रे उक्तं स्थानकरणलक्षणम् अनुरुन्धानैः तत् करणतया उक्तम् । स्थानविषये च इत्थं निर्णीतम् – तैत्तिरीयप्रातिशाख्ये (२-३५) ''हनूमूले जिह्वामूलेन कवर्गे स्पर्शयति'' इति व्यक्तदर्शनात् योग्यत्वाच्च कवर्गे उच्चारणीये जिह्वामूलेन करणेन स्वोपरि विद्यमाने हनूमूलशब्दोपलक्षिते चवर्गस्थानात् तालुनः प्रत्यग् विद्यमाने अस्माभिश्च कोमलतालुशब्देन कथिते अवयवे स्पर्शनं क्रियते । यत्र च संसर्गः तत् स्थानम् । ततः स एव कोमलताल्वाख्यः अवयवः कवर्गस्य स्थानम् ।

अपि चात्र संवादाय उपपत्तिं ब्रूमः । अस्य हि विसर्गस्य स्वभावो यत् श्वासानुप्रदानेषु प्रथमद्वितीयस्पर्शेषु परतः स्थितेषु तत्सस्थानम् ऊष्माणं स्वस्थाने विनिवेश्य तिरोधत्ते । यथा –

रामः च - रामश्च, रामः टिट्टिभम् - रामष्टिट्टिभम्,

रामः तत्र - रामस्तत्र, रामः पाति - राम≍पाति

एवं कखयोरपि परयोः विसर्गः तत्स्थानमेव ऊष्माणम् आपद्यते इति न्याय्यम्। आपद्यते च जिह्वामूलीयम्। यथा –

रामः कुत्र - राम)(कुत्र, रामः खादति - राम)(खादति।

एवं च जिह्वामूलस्य जिह्वामूलमिति स्थाने उक्ते कवर्गस्य कथं कण्ठः स्थानं स्यादिति सुधीभिः विचारणीयम्। अस्मन्मते तु जिह्वामूलं करणं, कोमलतालु च स्थानं यथाप्रतिपादितम्।

एवं च अकुहेति वचने कण्ठशब्दः ''गङ्गायां मीनघोषौ'' इत्यत्र गङ्गाशब्द इव द्वाभ्यां वृत्तिभ्यां द्वौ अर्थौ प्रतिपादयतीत्येव अगत्या अङ्गीकर्तव्यम् । दीक्षितैरेव च यदि इदम् उदघाटयिष्यत, नैवाभविष्यद् अद्यतनानां बहूनां पठितॄणां भ्रान्तिः। अस्माभिस्तु इमं सर्वं सन्देह-भ्रान्त्यादिरूपं पङ्कं दूरादस्प्रष्टुमेव कण्ठस्थानतोक्तिं परित्यज्य कोमलतालव्याख्यम् अनवद्यं स्थानम् आदृतम्। जिह्वामूलं च करणत्वेन स्वीकृतमेव॥

८) अनुस्वारे हन्वोः संस्पर्शं दन्तपङ्क्त्योः स्पर्शनेन निर्वर्त्यं वदसि। तत्र किं मानम् ?

अनुस्वारो न स्वरः, न व्यञ्जनम् । स नासिकया उत्पाद्यते इति तु प्रसिद्धम् । व्यञ्जनत्वव्यावृत्तये स्पृष्टादयः चत्वारः संसर्गाः परिहार्याः। स्वरत्वव्यावृत्तये च मुखेन वायुः न निर्गच्छेत्। सर्वेषु हि स्वरेषु स तथा निर्गच्छति। स्पृष्टादिसंसर्गपरिहारेण मुखस्य कथं निरुद्धता कर्तव्या विना हन्वोः परस्परसंस्पर्शम् ? तस्मात् यद् हनू संस्पृष्टे कृत्वा नासिकया उच्चारयति तदेव केवलया नासिकया उच्चारितं भवति, तदेव च अनुस्वारश्रुतिर्भवति।

अनुस्वारे बहवो मकारस्य श्रुतिं कुर्वन्ति, अन्ये नकारस्य। अयुक्तमुभयम्। अन्यो हि वर्णोऽनुस्वारो मकारान्नकाराच्च । ''मोऽनुस्वारः'' ''नश्चापदान्तस्य'' इति हि (८-३-२३, २४) वर्णान्यत्वे एव सम्भवति । वर्णान्यत्वं च श्रुतिवैलक्षण्येनैव भवेत्, काले अर्धमात्रात्मके वैलक्षण्याभावात्। तस्माद् हनुसंस्पर्शेन उच्चार्यमाण एव अनुस्वारः। अनुस्वारश्रुतेश्च शुद्धतया उच्चारणस्य रीतिः ६५ सूत्रे प्रतिपादिता, तदभ्यासरीतिश्च ६३ पुटे॥

९) उवर्णश्रुतौ जिह्वाया व्यापारः अस्तीत्यत्र किं प्रमाणम् ? उवर्णे खलु ओष्ठयोरेव व्यापारः ।

उवर्णश्रुतौ ओष्ठयोः व्यापारः प्रत्यक्षः, ग्रन्थे च उक्तः । यश्च जिह्वाव्यापारः सोऽपि प्रत्यक्ष एव । स्वयं परीक्ष्यतां तावत् दर्पणस्य पुरतो मुखं विवृतं कृत्वा उकारोच्चारणप्रयत्नेन जिह्वा उत्तिष्ठति न वेति । सर्वासां स्वरश्रुतीनां सर्वेषु व्यापारेषु उच्यमानेषु अयमपि व्यापारः प्रत्यक्षसत्यत्वात् मम वक्तव्यः समभूत् । प्राचीनास्तु आजानाभ्यासेन सिद्धोऽयम्, अनर्थकोऽस्य उपदेश इति मत्वा उदासीना अभूवन् इति मन्ये ॥

न च जिह्वाव्यापारस्य प्राचीनैरनुपदिष्टत्वात् अकर्तव्यत्वमेव इत्याग्रहीतुम् उचितम् । तथा क्रियमाणे प्रण्यस्तजिह्वा संवृतहनुः उपसंहृतोष्ठा श्रुतिः भवेत् । सा च अकारश्रुतेः ओष्ठोपसंहारमात्रेण विलक्षणा । उच्चार्यैव तर्हि परीक्ष्यताम् । [अ] इति श्रुतेः ओष्ठोपसंहाराधिक्येन या श्रुतिर्जायते सा तु नैव [उ] इति शुद्धा उवर्णश्रुतिः भवति । अन्या श्रुतिस्तदा जायते यस्याः चैनीस् स्वीडिष् ऐरिष् इत्यादिषु भाषान्तरेषु वर्णत्वेनोपयोगः । उच्चारणं तु तस्याः न लिप्या गमयितुं शक्यते । तस्माद् अवश्यं शुद्धायाम् उवर्णश्रुतौ जिह्वाव्यापारोऽस्ति ॥

१०) हकारस्य परस्वरश्रुतिवत्, विसर्गस्य पूर्ववत् इत्येते सूत्रे किंप्रमाणे ?

तैत्तिरीयप्रातिशाख्ये २-४७,४८ सूत्रे दृश्येताम् । अतिदेशयोः इमे प्रमाणे । हकारस्य परस्वरालाभे अकारश्रुतिसादृश्यं तु ''अनादेशे प्रण्यस्ता जिह्वा'' ''अकारवदोष्ठौ'' इत्येताभ्यां (२-२०,२१) सूत्राभ्याम् । सम्प्रदायश्च लौकिकवैदिकः विसर्गविषयं विशेषतोऽनुगृह्णाति । तत्साहचर्यात् अबाधितत्वाच्च हकारविषयमपि अनुगृहीतं मन्यामहे ॥

११) होराया अष्टादशसहस्रतमो भागो मात्रा इत्यत्र किं प्रमाणम् ?

ज्योतिर्विदा भास्कराचार्येण विरचिते सिद्धान्तशिरोमणौ पठ्यते –

गुर्वक्षरैः खेन्दुमितैः असुः, तैः षड्भिः पलं, तैर्घटिका खषड्भिः ।
स्याद् वा घटीषष्टिः अहः, खरामैः मासो दिनैः, तैः द्विकुभिश्च वर्षम् ॥

अस्य फलितार्थः – दशभिः दीर्घाक्षरैः असुर्नाम कालः, षड्भिरसुभिः पलं, षष्ट्या पलैः घटिका, षष्ट्या घटिकाभिः अहः, त्रिंशता अहोभिः मासः, द्वादशभिर्मासैः वर्षम् – इति । अत्र अहःशब्देन अहोरात्रो विवक्षित इति व्यक्तं, त्रिंशता मास इत्युक्तत्वात् । अहोरात्रे च षष्टिर्घटिकाः,

चतुर्विंशतिर्वा होराः । गणनाकुशलैः इतः प्राप्तुं शक्यते दीर्घाक्षरकालस्य होराया नवसहस्रतमभागत्वम् । ह्रस्वाक्षरकालश्च ततो मात्रात्मकः होरायाः अष्टादशसहस्रतमो भाग इति स्पष्टम् । तस्मात् तदेव ग्रन्थे उक्तम् । यच्चान्यद् लक्षणं मात्रायाः –

चाषोक्त एकमात्रः स्याद् वायसेन द्विमात्रिकः ।
मयूरेण त्रिमात्रश्च नकुलस्त्वर्धमात्रिकम् ॥

इति इदमपि भगवत्सृष्टिविशेषात् यथातथमेव वर्तते । अवश्यं वर्तते चाषरुतं मात्रामितम् – इदमस्माभिः यन्त्रसहायेन परीक्षितम् । इतरेषामपि तथा युक्तता । पुरा खलु नानाविहङ्गजुष्टेषु आश्रमपदेषु वसन्तो विद्योप्सवः ईदृशानि लक्षणानि लघु गृह्णन्ति स्म । अद्यत्वे पुनरस्माभिः चाष एव रूपेण प्रत्यभिज्ञायेत वा न वा, कुतस्तद्रुतमिति गणितरीतिरेव सुज्ञानतामातनोति विषयस्य ।

यानि पुनरन्यानि लक्षणानि अङ्गुलिस्फोटनकालो मात्रा, विद्युत्कालो मात्रा इत्येवमादीनि, तानि अतिसूक्ष्मतामात्रं मात्राया वदन्तीति अतिस्थूलत्वात् बालानां परिचयार्थान्येव न विषयज्ञाने उपकुर्वन्ति ॥

१२) पृक्तस्वराणां यः अवयवविभाग उक्तः तत्र किं मानम् ?

ऋकारस्य स्वरूपं हि श्लिष्टं पादचतुष्टयम् ।
पादेषु तेषु विज्ञेयौ आदावन्ते स्वरात्मकौ ।
अणू रेफस्य मध्ये द्वौ विज्ञेयौ व्यञ्जनात्मकौ ॥

इति शिक्षा । अस्यार्थः – मात्रिके ऋकारे चत्वारः पादाः । तत्र प्रथमश्चतुर्थश्च स्वरश्रुतिमान्, मध्ये द्वितीयतृतीयौ व्यञ्जनश्रुतिमन्तौ – इति । तैत्तिरीयप्रातिशाख्ये च (२-१८) ऋकारादिषु जिह्वाया बर्स्वेषु उपसंहार उक्तः । स च स्वरश्रुत्युत्पादकः स्वभावतः, ऋलृवर्णयोः समोक्तेश्च । इदं चास्ति वचनम् ''ऋटुरषाणां मूर्धा'' इति । तत्र ऋकारे या रेफश्रुतिः साऽवश्यं मूर्धस्थाना इति कृत्वा तया स्वगर्भे वर्तमानया ऋकारोऽपि मूर्धस्थानो भवति । आद्यान्त्ययोः पादयोस्तु स्वरश्रुतिमतोः बर्स्वेषु जिह्वाव्यापार इत्येव उचितम् । अयं चैव स्वरश्रुतिमान् भागः प्राचीनानां व्यपदेशम् अनुसृत्य अज्भक्तिरित्युक्तः, तच्छ्रुतिश्च रेफश्रुतेः पृथगेव निरुक्ता अस्माभिः । ताभ्यां निरुक्ताभ्यां तत्र शिक्षोक्तकालयोगेन ऋकारोऽपि निरुक्तः । एवं च यथाशास्त्रमेव ह्रस्व ऋकारो निरुक्तः इति ।

दीर्घश्च । लोकवेदसम्प्रदाये हि सर्वत्र 'तत्रापश्यत् स्थितान् पार्थः पितॄनथ पितामहान्'

इत्यादौ ऋकारे रेफश्रुत्युत्तरायाः अज्भक्तिस्वरश्रुतेः भूयस्ता श्रूयते ह्रस्वापेक्षया । पूर्वा तु अज्भक्तिश्रुतिः रेफश्रुतिश्च तावत्येव श्रूयते यावती ह्रस्वे । एवं च पूर्वस्या अज्भक्तिश्रुतेः रेफश्रुतेश्च ह्रस्वेन समानताम् उक्त्वा उत्तरस्याः शेषकालव्यापित्वम् उक्तम् अस्माभिः । प्लुतस्य तु वेदे लोके वा (शास्त्रादन्यत्र) श्रवणं नास्ति । अथापि ऋलृक्-सूत्रे भाष्ये होतृकारे ऋवर्णप्लुतः इष्टत्वेन ध्वनितः । तत्रापि दीर्घसाम्यौचित्यं मत्वा उत्तरस्याः अज्भक्तिश्रुतेः शेषकालव्यापित्वमुक्तम् ।

ह्रस्वस्य लृकारस्य च भाषायां स्वाभाविकः प्रयोगः क्लृपिधातुविषय एव । तत्र च पूर्वावस्थायां कृप् इति वर्तमाने धातौ ''कृपो रो लः'' (८-२-१८) इत्यनेन पाणिनीयसूत्रेण रश्रुतेः स्थाने लश्रुतिर्भवति इत्युक्तम् । तर्हि ऋकारे यत्र रेफश्रुतिः तत्र लकारश्रुत्या लृकारो भवति । एवमेव च लृकारो निरुक्तोऽस्माभिः । लृकारप्लुतश्च ऋलृक्-सूत्रे भाष्ये क्लृ(३)प्तशिखः इति प्रदर्शितः । तत्रापि ऋवर्णप्लुतवदेव व्याख्यानमुचितम् इति तथैव कृतम् ।

अत्र विदुषामपरः प्रश्नो भवति । ''अकः सवर्णे दीर्घः'' (६-१-१०१) इत्यत्र वार्तिके ''ऋति ॠ वा'' ''ऌति ॡ वा'' इति द्वौ नूतनौ आदेशौ उच्येते । भाष्ये च तयोः प्लुतोऽप्युच्यते । तेषां किं स्वरूपमिति । तं तु विषयम् अत्र न स्पृशामः, तत्र सुदीर्घस्य विचारस्य कर्तव्यत्वात् तस्य च एतद्ग्रन्थसमर्थने नान्तरीयकत्वाभावात् । तेषां वर्णानां ग्रन्थे उपन्यासस्तु न कृतः, पाणिनिना अनुक्तत्वात्, अनुष्ठाने अभावाच्च । अपि च एतत्पुस्तके पुस्तकान्तरे वा उपयुक्ते कस्मिन्नपि एतदादेशचिह्ने नैव आदरः कार्यः वर्णज्ञाने लिपेः महाप्रतिबन्धकत्वं स्मरद्भिः ॥

१३) ऐ औ इत्यनयोः दीर्घस्य चतुर्मात्रप्लुतस्य च ग्रन्थोक्ते स्वरूपे किं मानम् ?

एओङ्-ऐऔच्-सूत्रे भाष्ये वर्णैकदेशग्रहणवादे ''यदत्रावर्णं विवृततरं तदन्यस्माद् अवर्णात्'' इति अत्रत्यस्य अवर्णस्य विवृतता उक्ता, तस्माद् एषु वर्णेषु अकारश्रुतेः विवृततरा आकारश्रुतिः उपदिष्टा । प्लुतविषये च ''प्लुतावैच इदुतौ'' इति सूत्रं (८-२-१०६) तद्भाष्यादि च प्रमाणम् । उत्तरेण तु ''एचोऽप्रगृह्यस्य'' इति सूत्रेण आ(३)इ आ(३)उ इति द्विवर्णौ आदेशौ उच्येते, न अनेन उक्तौ ऐ(४) औ(४) इत्येताविव एकवर्णौ इत्यन्यत्र विवरिष्यामः ॥

१४) यमवर्णानां चतुर्णां पाणिनीयशिक्षोक्तत्रिषष्टिसङ्ख्यापूरकाणां कुतो नोपदेशः कृतः ?

पाणिनिना भाषायां पदावयवत्वेन अनुपदिष्टत्वात् वेदमात्रविषयत्वेन प्रसिद्धेश्च ॥

१५) हकारस्य पञ्चमान्तस्स्थायोगे उरस्यत्वं श्रूयते। तत् कुतो न प्रतिपादितं ग्रन्थे ?

इदमस्ति शिक्षावचनं यदिमं विचारम् अवतारयति –

हकारं पञ्चमैर्युक्तम् अन्तस्स्थाभिश्च संयुतम्।
उरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्॥

पञ्चमैः अन्तस्स्थाभिश्च संयोगे हकारः उरःस्थानो भवतीत्यस्यार्थः। परन्तु आचार्य आह – ''अथ शब्दोत्पत्तिः, वायुशरीरसमीरणात् कण्ठोरसोः सन्धाने'' इति (तैत्तिरीयप्रातिशाख्ये २-१,२)। तत्र यदि कण्ठोरस्सन्धाने एव प्रथमा शब्दोत्पत्तिः, नैव उरसि शब्द उत्पत्तुं शक्नोति।

अथ सामान्यवचनस्य विशेषवचनं बाधकम् ? न, असम्भवात्। न हि उरसि शब्दोत्पत्तिः सम्भवति, तत्र शब्दोत्पादनयोग्यस्य अवयवस्य अभावात्।

तर्हि कोऽर्थः उरस्यत्ववचनस्य ? स्यात् तत्र उरसा भूयसो वायोः निस्सारणात् उरस्यत्वम् उच्यते। परं तथा विशेषेण वैदिकेषु शब्देषु नानुभूयते।

किञ्च हकारः पुरस्तात् पश्चाद् उभयतो वा पञ्चमैः अन्तस्स्थाभिश्च संयुज्येत।

पुरस्तात्तावत् – प्रत्यङ्होता, तस्मिन्हि, बर्हिः, मल्हा इत्यादि।

पश्चाच्च गृह्णाति, अह्ना, ब्रह्मा, मह्यं, ह्रस्वः, आह्लादः, जिह्वा इत्यादि।

उभयतश्च तस्मिन्ह्यात्मानम्, तान्ह्वयति, निर्ह्रासः इत्यादि।

किं सर्वत्र उरस्यत्वम्, उत पश्चात्संयोगे सत्येव ? अत्र भगवानेव उत्तरं प्रष्टव्यः।

एकेषां च सम्प्रदाये एवं पञ्चमैः संयुक्तो हकारः तैः वर्णैः क्रमव्यत्ययेन, तैः मिश्र इव च उच्चार्यते। अत्रापि सम्प्रदायाद् अन्यस्य वचनात्मकस्य प्रमाणस्य उपलब्धये भगवानेव शरणम्॥

*

इत्थं यथामति ग्रन्थेऽस्मिन् सम्भावितानां केषाञ्चित् प्रश्नानाम् उत्तरं प्रादायि। क्वचिच्च भगवानेव शरणीकृतः। येषाम् अत उपरि सन्देहा वा प्रश्ना वा सम्भवेयुः, पुनः पुस्तकादौ प्रार्थितमेव प्रार्थये तान् यत् सावकाशं परामरीमर्शं (पुनःपुनः परामृश्य) च निपुणम् ईक्षितेऽपि ग्रन्थे यदि अवशिष्यते सन्देहविचिकित्सादिकम्, अवश्यं ८ पुटे प्रदत्तेन सम्पर्कसङ्केतेन मया सह संवादं विधाय ममापि उपकारं वितन्वन्तु इति॥

* * *

ॐ

॥ ग्रन्थकर्तुः उपसंहारवचांसि ॥

वचःशुचित्वं पदवाक्यसाधुतामात्रेण नो सिध्यति वर्णलोपे ।
ततः सुबोधं परिनिश्चितार्थं सूत्रं प्रणीयाप्युपकर्तुमैच्छम् ॥ १ ॥
वर्णस्वभावान् विशदं प्रजानतां न हि प्रमादः सुकरो भवेद्यतः ।
न्यूनातिरिक्तं सकलं विवर्ज्य यथामति ग्रन्थमकार्षमत्र ॥ २ ॥
शास्त्रं किलेदं बहुकालविस्मृतं पुनः प्रतिष्ठामधिरोहतादिति ।
सङ्कल्प्य देवः परमो दयालुर्मामत्र किञ्चिज्ज्ञमपि न्ययुङ्क्त ॥ ३ ॥
विज्ञा इदानीन्तनरीतिदक्षिणा वर्णस्वभावेषु यदध्यगीषत ।
यच्चर्षयो दीर्घदृशः पुराणा उपादिशन् सर्वमदो विचिन्त्य ॥ ४ ॥
स्वया धिया चैव परेशदत्तया विमृश्य पक्षप्रतिपक्षजातम् ।
यत् साधु भासेत तदत्र वच्मि दोषो यदि स्यात् प्रतिबोध्यतां बुधाः ॥ ५ ॥
कृतार्थ आचार्य इति स्थितावपि जिज्ञासुकोऽहं परबोधनोत्सुकः ।
तदेतदार्यैः करुणार्द्रचित्तैः श्रद्धैकदृग्भिः परिमृष्यतां मुदा ॥ ६ ॥

*

शिक्षां विस्मार्ष्ट मा जातु वर्णशुद्धिप्रदायिनीम् । यतो वेदे च लोके च वाचः शुद्धिरवाप्यते ॥ ७ ॥
वाचः शुद्ध्या मनःकायक्रियाशुद्धिसमेतया । अन्तःसत्त्वस्य संस्कारात् नरः श्रेयोऽनुविन्दति ॥ ८ ॥

*

ग्रन्थं क्व विन्यस्य भजेय निर्वृतिम् अन्यत्र हृत्पद्मनिवासिनोऽङ्घ्रेः ।
काञ्चीमहास्वामियतीश्वरस्य महागुणत्वाद् गुणपक्षपातिनः ॥ ९ ॥

ग्रन्थोऽयं सहृदयानां मानसे सनातनधर्मसम्प्रदायश्रद्धां संवर्ध्य साधुवर्णप्रयोगशीलतायां पर्यवस्यतु इत्याशासानः, यदीयया प्रेरणया इमा वाचः उत्थिताः तस्मा एवैनाः साष्टाङ्गपातं समर्पयामि ॥

॥ ॐ तत् सत् ॥

ॐ

॥ अकारादिक्रमेण सूत्रसूची ॥

अत्र सूत्राणि, तासां सूत्रपाठस्थाः क्रमसंख्याः, तदर्थविवरणपुटसंख्याः च लिख्यन्ते । तत्र च यानि सूत्राणि श्रुत्युच्चारणेन आरभन्ते, तानि आदौ सङ्गृहीतानि । यतः श्रुतयो वर्णैः न समानधर्माणः, तस्माद् न तेषु मध्ये तासां क्रमस्थापनम् उपपद्यते । तेषु पुनः अकारादिवर्णक्रमस्य अनुपपत्त्या सूत्रोपदिष्टः श्रुतिक्रम एव क्रमस्थापनाय आदृतः ।

सूत्रम्	**सूत्रसं०**	**पुटसं०**
[अ] इत्यस्या ह्रस्वेन	७४	४३
[अ आ] इत्यनयोरनुस्वारस्य च जिह्वा प्रण्यस्ता	६१	३९
[अ आ इ उ '*' ए ओ] इति सप्त स्वराणां श्रुतयः	५	२०
[अ इ उ '*'] इत्यासु तस्याः समीपे तिष्ठति	६६	४०
[आ ए ओ] इत्यासां दीर्घप्लुताभ्याम्	७५	४३
[आ ए ओ] इत्यासु ततो दूरे	६७	४०
[इ ए] इत्यनयोर्जिह्वामध्यं तालुसमीपे	६३	३९
[इ उ] इत्यनयोस्त्रिभिरपि	७६	४३
[उ ओ] इत्यनयोरोष्ठौ संवृतौ दीर्घौ च	६८	४०
[उ ओ] इत्यनयोर्जिह्वामूलं कोमलतालुसमीपे तिष्ठति	६२	३९
['*'] इत्यस्यां जिह्वाग्रं बर्स्वसमीपे	६४	३९
[क् ख् ग् घ् ङ् च् छ् ज् झ् ञ् ट् ठ् ड् ढ् ण् त् थ् द् ध् न् प् फ् ब् भ् म्] इति पञ्चविंशतिः स्पर्शानाम्	६	२०
[य् व् ल्] इति तिस्रोऽन्तस्स्थानाम्	७	२०
[र्] इत्येका रेफस्य	८	२०
[ऽ श् ष् स् ऽ] इति पञ्चोष्मणाम्	९	२०
[ह् ':'] इति द्वे केवलकण्ठ्ययोः	११	२१
[''] इत्येकाऽनुस्वारस्य	१२	२१

सूत्रम्	सूत्रसं०	पुटसं०
अथ कालः	७०	४२
अथ व्यञ्जनानां विशेषौ	४४	३४
अथ व्यञ्जनेतरेषां विशेषाः	५८	३८
अथ शिक्षायां प्रथमा क्लृप्तिः	१	१७
अथ श्रुतीनां धर्मतो निरुक्तिः	१५	२१
अथ साधारणाः	१९	२३
अथानेकश्रुतयो वर्णाः	७८	४४
अथैकश्रुतयो वर्णाः	७३	४३
अनुप्रदानं प्राण आनुनासिक्यं संसर्ग इति साधारणा धर्माः	१६	२२
अनुस्वारस्याधरा हनुरुत्तरां स्पृशति	६५	३९
अन्तस्स्थानाम् ईषत्स्पृष्टं, तत्र करणम् अल्पदेशेन स्थानं स्पृशति	३९	३०
आस्यावयवयोः सम्बन्धः संसर्गः	३३	२८
इति चतुश्चत्वारिंशत् सर्ववर्णानाम्	१४	२१
इति चतुस्त्रिंशद् व्यञ्जनानाम्	१०	२१
इति तिस्र उपस्वराणाम्	१३	२१
इति नवपञ्चाशद् वर्णाः संस्कृताः	८९	४७
इति शिक्षायां प्रथमा क्लृप्तिः प्रथमा क्लृप्तिः	९०	४७
इतरासां नादः	२५	२४
इतरासां न	३२	२७
इतरासाम् अल्पः	२८	२६
इतरास्वक्रियौ	६९	४०
उत्तरदन्तेष्वृजु	५५	३५
ऊष्मणाम् ईषद्विवृतं, तत्र करणं स्थानस्यातिसमीपं नीयते	३८	३०
ऋ ॠ ॠ(३) इति त्रिकालाः स्वराः	७९	४४
ऌ ॡ(३) इति ह्रस्वप्लुतकालौ	८०	४४

सूत्रम्	सूत्रसं०	पुटसं०
एका द्वे तिस्रो मात्रा ह्रस्वो दीर्घः प्लुतः	७२	४२
एष्वादौ मात्रापादम् ['*'] इत्येषा	८१	४४
एष्वादौ मात्राम् [आ] इत्येषा	८६	४६
ऐ औ इति दीर्घकालौ	८४	४५
ऐ(४) औ(४) इति चतुर्मात्रौ प्लुताख्यौ	८५	४५
ओष्ठयोरोष्ठावेव	५७	३५
कण्ठे वायुसमीरणाद् उत्पन्नो ध्वनिरनुप्रदानम्	२०	२३
कोमलतालु तालु मूर्धोत्तरदन्ता ओष्ठौ च स्थानानि	४५	३४
कोमलतालुनि स्थाने जिह्वामूलं करणम्	५२	३४
यस्मिन् येन ते स्थानकरणे	३४	२८
कवर्गजिह्वामूलीययोः कोमलतालु	४६	३४
चवर्गयशानां तालु	४७	३४
जिह्वामूलं जिह्वामध्यं जिह्वाग्रम् ओष्ठौ च करणानि	५१	३४
जिह्वाहन्वोष्ठविन्यासा इतरासाम्	१८	२२
टवर्गरषाणां मूर्धा	४८	३४
ततः शेषम् आदाविव	८३	४४
ततो दीर्घ एकां मात्राम् [इ उ] इत्येते	८७	४६
ततो मात्रार्धं त्रिषु रेफस्य द्वयोर्लकारस्य	८२	४४
तद् द्विधा, अन्ततो मध्यतश्च	४०	३०
तद् द्विधा, नादः श्वासश्चेति	२१	२३
तवर्गवलसानाम् उत्तरदन्ताः	४९	३४
तालुनि जिह्वामध्यम्	५३	३५
द्वितीयचतुर्थस्पर्शानाम् ऊष्मणां केवलकण्ठ्ययोश्च स महान्	२७	२६
नासिकया वायोः संस्कार आनुनासिक्यम्	२९	२६
पञ्चमस्पर्शानाम् अनुस्वारस्य च	३०	२७

सूत्रम्	सूत्रसं०	पुटसं०
पदचरमावयवो वर्णः	३	१८
पवर्गोपध्मानीययोरोष्ठौ	५०	३४
प्रथमद्वितीयस्पर्शानाम् ऊष्मणां विसर्गस्य च श्वासोऽनुप्रदानम्	२४	२४
प्लुते तिस्रः	८८	४६
मूर्ध्नि प्रतिवेष्टितं जिह्वाग्रम्	५४	३५
यवयोरन्ततईषत्स्पृष्टं, तत्र करणम् अन्ताभ्यां स्थानं स्पृशति	४१	३०
रेफस्य रिफितं, तत्र करणम् असकृत् स्थानम् आहन्ति	३७	२९
लस्य मध्यतईषत्स्पृष्टं, तत्र करणं मध्येन स्थानं स्पृशति	४२	३१
वकारस्य त्वधरोष्ठः	५६	३५
वर्णश्रुतिरेकाऽनेका वा कालपरिच्छिन्ना	४	१८
वर्णान् व्याख्यास्यामः	२	१८
वा स्वराणाम् अन्तस्स्थानां च	३१	२७
विवृते कण्ठे घोषाभाववान् ध्वनिः श्वासः	२३	२४
विसर्गस्य पूर्ववत्	६०	३८
व्यञ्जनेतरेषां न सम्बन्धः, तद् विवृतम्	४३	३२
संवृते कण्ठे समीराणे वायौ कम्पनम् उत्पद्यते, स घोषः, तद्वान् ध्वनिर्नादः	२२	२३
स पञ्चधा, स्पृष्टं रिफितम् ईषद्विवृतम् ईषत्स्पृष्टं विवृतं चेति	३५	२८
समीराणवायुपरिमाणं प्राणः	२६	२६
स्थानकरणे व्यञ्जनानां विशेषौ	१७	२२
स्पर्शानां स्पृष्टं, तत्र करणं सर्वदेशेन स्थानं स्पृशति	३६	२८
स्वरेतरेषाम् अर्धमात्रया	७७	४३
हकारस्य परस्वरश्रुतिवत् तदभावे [अ] इतिवत्	५९	३८
होराया अष्टादशाहतसहस्रतमो भागो मात्रा	७१	४२

* * *